शोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्नयप्रतरंवस्योऽअच्छाभिसुम्न
न्देवभक्तंयविष्ठ २६ आतम् ॥ आतम्भजसौश्रवसेष्वग्नऽउक्थ
ऽउक्थऽआभजशस्यमाने ॥ प्रियःसूर्य्येप्रियोऽअग्नाभवात्युज्जा
तेनभिनदुज्जानित्वैः २७ त्वामग्ने ॥ त्वामग्नेयजमानाऽअनुद्यून्वि ७०
श्वावसुंदधिरेवार्य्याणि ॥ त्वयासहद्रविणमिच्छमानाव्रजङ्गोमन्त

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुशिजोव्विवेब्बुः २८ अस्तांह्यग्निः। अस्तांह्युग्निन्नुंराॅसुशेवोवि
श्श्वान्नुरऽक्रृषिंभिःसोमंगोपाः॥ अद्वेषेद्यावांपृथिवीहुंवेमदेवांधुत्त
रुयिमुस्म्मेसुवीरम् २९ [१२] सुमिधाुग्निम्॥ सुमिधाुग्निन्दुंव
स्यतघृतैर्बोधयुतातिंथिम्॥ आस्मिन्न्हुव्याजुंहोतन ३० उदंत्त्वा॥
उदंत्त्वाव्विश्श्वेदेवाऽअग्ग्नेभरंन्तुचित्तिंभिः॥ सनोभवशिवस्त्वॅसु
प्प्रतींकोव्विभावंसुः ३१ प्रेत॥ प्रेदंग्ग्नेज्ज्योतिंष्म्मान्न्याहिशिवेभिंर
र्च्चिभिष्ट्वम्॥ बृहद्भिर्भानुभिर्भासुन्माहिंॅसीस्तुन्न्वाप्प्रुजाः ३२ अ
क्रन्दद्ग्निः॥ अक्क्रन्दद्ग्निस्तनयंन्निवद्यौःक्षामारेरिंहद्वीरुधंःसम
ञ्जन्॥ सुद्योजंज्ञुासोव्विहीमिद्धोऽअक्ख्युदारोदंसीभानुनांभात्त्यु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्तः ३३ प्रप्प्रायम ॥ प्रप्प्रायमग्निर्भरतस्यशृण्वेवियत्सूरुषोनरो
चंतेबृहद्धाः॥ अभियःपूरुम्पृतनासुतस्थौदीदायदैव्योऽअतिथिःशि
वोनः३४ आपोदेवीः ॥आपोदेवीःप्प्रतिगृभ्णीतभस्म्मैतत्स्योनेकृ
णुद्ध्वंसुरभाऽउलोके ॥ तस्म्मैनमन्ताजनयःसुपत्नीर्म्मातेवपुत्रम्बि
भृताप्प्स्वेनत् ३५ अप्प्स्वेग्ने ॥ अप्प्स्वग्नेसधिष्टवसौषधीरनुरुध्य
से॥गर्भेसञ्जायसेपुनः३६ गर्भोऽअसि॥ गर्भोअस्योषधीनाङ्गर्भो
वनस्प्पतीनाम ॥ गर्भोविश्श्वस्यभूतस्याग्नेगर्भोऽअपामसि ३७
प्रसद्यभस्म्मना ॥ प्रसद्यभस्म्मनायोनिमपश्श्चपृथिवीमग्ने ॥ सु
सृज्ज्यमातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदः ३८ पुनरासद्य। पुनरास



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्युसदनमुपश्च्चपृथिवीमंग्ने ॥ शेषेमातुर्य्यथोपस्थेन्तरंस्याᳪंशिव
तमः ३९ पुनरूर्जा ॥ निवर्त्तस्वपुनरग्नऽइषायुषा ॥ पुनर्न्नः पाह्य
ᳪंहसः ४० सहरय्या ॥ निवर्त्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्प्स्न्या
विश्वतस्प्परि ४१ बोधामे ॥ ऽअस्यवचसोयविष्ठमᳪंहिष्ठस्यप्रभृ
तस्यस्वधावः ॥ पीयतित्त्वोऽअनुत्त्वोगृणातिवन्दारुष्टेतन्न्वंवन्देऽअ
ग्ने ४२ सबोधि ॥ सूरिर्म्मघवावसुपतेवसुदावन् ॥ युयोद्ध्यस्म्मद्द्वे
षांᳪंसिविश्वकर्म्मणेस्वाहा ४३ पुनस्त्वा ॥ दित्त्यारुद्द्रावसवः स
मिन्धताम्पुनर्ब्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्त्वन्तन्न्ववर्द्धयस्वस
त्त्याः सन्तुयजमानस्यकामाः ४४ [ १५ ] अपेत ॥ अपेतवीतवि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चंसर्प्पतातोयेत्रस्थपुराणायेचनूतनाः ॥ अदाद्यमोवसानम्पृथि
व्याऽअक्रन्निमम्पितरोलोकमस्म्मै ४५ सञ्ज्ञानमासि ॥ कामधरणं
म्मयितेकामधरणम्भूयात् ॥ अग्नेर्भस्म्मास्यग्नेःपुरीषमासिचित
स्थपरिचितऽऊर्द्ध्वचितःश्रयद्ध्वम् ४६ अयꣳसः ॥ अयꣳसोऽअग्नि
र्यस्म्मिन्त्सोममिन्द्रःसुतन्दधेजठरेवावशानः ॥ सहस्त्रियम्वाजम
त्त्यन्नसर्ण्णिꣳससवान्त्सन्त्स्तूयसेजातवेदः ४७ अग्नेयत् ॥ अग्ने
यत्तेदिविवर्च्चःपृथिव्यांयदोषधीष्वप्स्वायजत्र ॥ येनान्तरिक्षमु
र्व्वाततन्थत्वेषःसभानुरर्ण्णवोनृचक्षाः ४८ अग्नेदिवः ॥ अग्नेदिवो
ऽअर्ण्णमच्छाजिगास्यच्छादेवाꣳ ॥ ऽऊचिषेधिष्ण्याये ॥ यारोचनेप



For Private and Personal Use Only

रस्तात्सूर्य्यस्यषाश्चावस्तादुपतिष्ठन्तुऽआपं÷ ४९ पुरीष्यासोऽअ
ग्नयं÷ ॥ प्रावणेभि÷सुजोषसः ॥ जुषन्ताङ्यज्ञमद्रुहोनमीवाऽइषो
महीः ५० इडामग्ने ॥ पुरुदꣳसꣳसुनिङ्गोःशश्वत्तमꣳहवमानायसा
ध ॥ स्यान्नं÷सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्त्वस्म्मे ५१ अ
यन्ते ॥ अयन्तेयोनिर्ऋत्त्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्न
ग्नऽआरोहाथानोवर्द्धयारयिम् ॥ ५२ ॥ चिदसि ॥ चिदसितयादे
वतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीद ५३
लोकम्पृण ॥ छिद्रम्पृणाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नित्त्वावृहस्प्प
तिरस्मिन्न्योनावसीषदन् ५४ ताऽअस्य ॥ सूददोहसःसोमꣳश्री

णन्तिपृश्न्नयः ॥ जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः ५५ इन्द्रं
विश्श्वाः ॥ इन्द्रंविश्श्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ॥ रथीतम
ꣳरथीनांवाजानाꣳसत्पतिम्पतिम् ५६ समितम ॥ समितꣳसङ्कल्प्पे
थाꣳसम्प्रियौरोचिष्णुसुमनस्यमानौ ॥ इषमूर्ज्जमभिसंवसानौ५७
संवाम॥संवाम्मनाꣳसिसंव्रतासमुचित्तान्याकरम् ॥अग्नेपुरीष्ष्या
धिपाभवत्त्वन्नऽइषमूर्ज्जंयजमानायधेहि ५८ अग्नेत्त्वम् ॥ अग्ने
त्त्वम्पुरीष्ष्योरयिमान्पुष्टिमाꣳ॥ऽअसि ॥ शिवाꣳकृत्त्वादिशःसर्वाः
स्वंयोनिमिहासदः ५९ भवतन्नः ॥ भवतन्नःसमनसौसचेतसाव
रेपसौ ॥ मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिञ्जातवेदसौशिवौभवतमद्य ७३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नं÷ ६० मातेवंपुत्रम् ॥ मातेवंपुत्रम्पृथिवीपुरीष्ष्यमुग्निꣳस्वेयोनां
वभारुषा ॥ तांविश्श्वैर्देवैर्ऋतुभिं÷संविदानः प्प्रजापंतिर्विश्श्वक
र्म्माविमुंञ्चतु ६१ [ ७ ] असुंन्वन्तमयंजमानम् ॥ असुंन्वन्तम
यंजमानमिछस्तेनस्येत्यामन्विहितस्कंरस्य ॥ अन्न्यमुस्म्मदिंछसा
तंऽइत्त्यानमोंदेविनिर्ऋतेतुभ्यंमस्तु ६२ नमुꣳसुतेंनिर्ऋतेतिग्मतेजो
युस्म्मयुंविचृंताबन्धमेतम् ॥ यमेनुत्त्वंꣳयुम्म्यासंविदानोत्तमेनाके
ऽअधिंरोहयैनम् ६३ यस्यांस्ते ॥ घोरऽआसञ्जुहोम्म्येषाम्बन्धानां
मवसर्ज्जनाय ॥ यान्त्वाजनोभूमिरितिंप्प्रमदंन्तानिर्ऋतिन्त्वाहम्परि
वेदविश्श्वतं÷ ६४ यन्तेंदेवीनिर्ऋतिराबुबन्धपाशंङ्ग्रीवास्वंविचृत्त्यम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्तेव्विष्ष्युाम्म्यायुंषोनमद्धयादथैतम्पितुमांद्धिप्प्रसूतः ॥ नमोभू
त्त्यैयेदञ्चकारं ६५ निवेशंनःसङ्गमंनः ॥ निवेशंनःसङ्गमंनोव्वसूनां
व्विश्श्वारूपाभिर्वसूुशचीभिः ॥ देवऽइंवसवितासत्त्यधर्म्मैन्द्रोनतं
स्त्थौसमरेपंथीनाम ६६ सीरायुञ्जन्ति ॥ कवयोयुगाव्वितंन्वतेपृथं
क् ॥ धीरांदेवेषुसुम्न्नया ६७ युनक्तसीरां ॥ युनक्तसीराव्वियुगातं
नुद्ध्वङ्कृतेयोनौव्वपतेहवीजंम् ॥ गिराचंश्श्रुष्टिःसभंराऽअसंन्नोनेदीय
ऽइत्त्सृण्यःपक्कमेयांत्६८शुनःसु ॥ फालाव्विकृंषन्तुभूमिंशुनङ्कीना
शांऽअभियंन्तुव्वाहैः ॥ शुनांसीराहविषातोशंमानासुपिप्पलाऽओषं
धीःकर्त्तनास्म्मे ६९ घृतेनसीतां ॥ घृतेनसीतामधुनासमंज्ज्यतांव्वि ७४

श्वैर्द्देवैरनुमतामुरुद्धिः ॥ ऊर्ज्जस्वतीपयसापिन्वमानास्म्मान्त्सीते
पयसाभ्याववृत्स्व ७० लाङ्गलम्पवीरवत् ॥ लाङ्गलम्पवीरवत्सु
शेवंसोमपित्सरु ॥ तदुद्वपतिगामविम्प्रफर्व्यञ्चपीवरीम्प्रस्थावद्रथ
वाहणम् ७१ कामङ्कामदुघे ॥ धुक्ष्व मित्रायवरुणायच ॥ इन्द्रायाः
श्विभ्याम्पूष्णेप्प्रजाभ्यऽओषधीभ्यः ७२ विमुच्यध्वम्॥ वि
मुच्यध्वमघ्याद्देवयानाऽअगन्मतमसस्प्पारमस्य । ज्ज्योतिरापाम
७३ सजूरब्दः । सजूरब्दोऽअयवोभिःसजूरुषाऽअरुणीभिः ॥ स
जोषसाविश्विनादंसोभिःसजूःसूरऽएतशेनसजूर्व्वैश्वानरऽइडया
घृतेनस्वाहा ७४ [ १३ ] याऽओषधीः ॥ याऽओषधीःपूर्व्वाजाता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





देवेभ्यस्त्रियुगम्पुरा॥मनैनुबभ्रूणामुहꣳशुतन्धामानिसप्तचं ॥७५ शतंवं॥ शतंवोऽअम्बधामानिसुहस्रमुतवोरुहं ॥ अधाशतक्रत्वो सूयमिमम्मेऽअगुदङ्कृत ७६ ओषधीःप्प्रति ॥ मोदद्धम्पुष्पवतीः प्प्रसूवरीः ॥ अश्वाऽइवसजित्वरीर्व्वीरुधःपारयिष्ण्णवः ७७ ओ षधीरिति ॥ मातरस्तद्वोदेवीरुपब्रुवे ॥ सनेयमश्वङ्गावासꣳऽआत्मा नन्तवपूरुष ७८ अश्वत्थेवं ॥ अश्वत्थेवोनिषदनम्पर्णेवोव्वस तिष्कृता॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ७९ यत्रौषधीः ॥ समग्मतराजानःसमिताविव ॥ विप्प्रःसऽउच्यतेभिषग्रक्षोहामी वचातनः ८० अश्वावतीꣳसोमावतीम् ॥ अश्वावतीꣳसोमा



For Private and Personal Use Only

वृतीमूर्जयन्तीमूदोजसम् ॥ आविंत्सिसर्वाऽओषधीरस्म्माऽअरिष्ट
तांतये ८१ उच्छुष्म्मांः ॥ उच्छुष्म्माऽओषधीनाङ्गावोगोष्ठादिवे
रते ॥ धनंऽसनिष्ष्यन्तीनामात्मानन्तवपूरुष ८२ इष्कृतिर्न्नामं॥
वोमातार्थोसूयऽस्त्थनिष्कृतीः ॥ सीराःपतत्रिणीस्त्थनयदामयति
निष्कृत्थ ८३ अतिविश्श्वाःपरिष्ठास्तेनऽइवव्रजमंक्रमुः ॥ ओष
धीःप्प्राचुच्च्यवुर्यत्किञ्चंतन्वोरपः ८४ यदिमाः ॥ यदिमावाजयं
न्नहमोषधीर्हस्तंऽआदधे ॥ आत्माषक्ष्मस्यनश्यतिपुराजीवगृभो
यथा ८५ यस्यौषधीः ॥ प्प्रसर्प्पथाङ्गंमङ्गम्परुंष्पपरुः ॥ ततोयक्ष्मं
विवाधध्वऽउग्ग्रोमंध्यमशीरिव ८६ साकंयक्ष्म ॥ साकंयक्ष्मप्रप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुचाषैणाकिकिदीविनां ॥ साकंवातंस्यद्राज्ज्योसाकन्नंश्यनिहाकं
या ८७ अन्यावं॑÷ ॥ अन्यावोऽअन्यामंवत्त्वन्याऽन्यस्याऽउपांव
त ॥ ताःसर्वा÷संविदानाऽइदम्मेप्प्रावंताव्वचं÷ ८८ याःफलीनीः ॥
याःफलिनीर्य्याऽअंफलाऽअंपुष्पायाश्चंपुष्पिणीः ॥ बृहस्प्पति
प्प्रसूतास्तानोमुञ्चन्त्वं॑हंसः ८९ मुञ्चन्तुंमा॥शपत्थ्यादथोवरुण्या
दुत ॥ अथोयमस्यपड्वींशात्सर्वस्म्मादेवकिल्बिषात् ९० अवपतंन्ती
रवदन् ॥ अवपतन्तीरवदन्दिवऽओषधयस्प्परिं ॥ यंञ्जीवमश्नवांम
हैनसरिष्प्यातिपूरुंषः ९१ याऽओषंधीः ॥ याऽओषंधीःसोमंराज्ञी
र्बह्वीःशतविंचक्षणाः ॥ तासांमसित्त्वमुंत्तमारङ्कामांयशं॑हृदे ९२



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

याऽओषधीः ॥ याऽओषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु ॥ बृह
स्पतिप्रसूताऽअस्यैसन्दत्तवीर्यम् १३ याश्च ॥ याश्चेदमुपशृण्व
न्तियाश्चदूरम्परागताः ॥ सर्वाःसङ्गत्यवीरुधोस्यैसन्दत्तवीर्यम्
१४ मावः ॥ मावोरिषत्खनितायस्मैचाहङ्खनामिवः ॥ द्विपाच्चतु
ष्पादस्माकंसर्वमस्त्वनातुरम् १५ ओषधयः सम् ॥ ओषधयः
समवदन्तसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तंराजन्पार
यामसि १६ नाशयित्रीबलासस्यार्शसऽउपचितामसि ॥ अथोश
तस्ययक्ष्माणाम्पाकारोरसिनाशनी १७ त्वाङ्गन्धर्वाः ॥ त्वाङ्गन्धर्वा
ऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधेसोमोराजाविद्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यक्ष्मांदमुञ्चयत ९८ सहस्वमे ॥ सहस्वमेऽअरांतीःसहस्वपृतनायु
तः ॥ सहस्वसर्वंपाप्मानुंसहमानास्योषधे९९ दीर्घायुस्ते ॥ दीर्घा
युंस्तऽओषधेखनिताषस्म्मैचत्त्वाखनांम्म्यहम् ॥ अथोत्त्वन्दीर्घा
युंर्भूत्त्वाशतवंल्शाविरोहतात् १०० त्वमुंत्तमा ॥ स्योषधेतववृक्षा
ऽउपंस्तयः॥ उपंस्तिरस्तुसोस्म्माकुंर्योऽअस्म्माँ२॥ ऽअभिदासंति
१०१ [ २७ ] मामांहिंसीज्जनिताषःपृथिव्यायोवादिवंसत्यधं
म्मार्व्यानट् ॥ षश्चापश्चन्द्राःप्प्रंथमोजजानकस्म्मैदेवायंहविषांवि
म १०२ अभ्यावंर्त्तस्व ॥ पृथिविषज्ञेनपयंसासह ॥ वपान्तेंऽअ
ग्गिरिंषितोऽअंरोहत् ॥ १०३ ॥ अग्नेषत् ॥ अग्नेषत्तेशुक्रंषच्चन्द्रं ७७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऊषत्पूतंऊषर्च्चंसुज्ञियंम् ॥ तद्देवेभ्योभरामसि १०४ इषमूर्ज्जम् ॥ इषु
मूर्ज्जमहामितऽआदंमृतस्युयोनिंम्महिषस्युधारांम् ॥ आमागोषुंविशु
त्वातनूषुजहांमिसेदिमनिरांममींवाम् १०५ अग्नेतवं ॥ अग्नेतव
श्श्रवोवयोमहिंभ्राजन्तेऽअर्च्चयोंविभावसो ॥ बृहंद्भानोशवंसावा
जंमुक्थ्युन्दधांसिदाशुषेंकवे १०६ पावकवंर्च्चाःशुक्रवंर्च्चाः ॥ पाव
कवंर्च्चाःशुक्रवंर्च्चाऽअनूंनवर्च्चाऽउदियर्षिभानुनां ॥ पुत्रोमातरांविच
रन्नुपांवसिपृणाक्षिरोदंसीऽउभे १०७ ऊर्ज्जोनपात् ॥ ऊर्ज्जोनपाज्जात
वेदःसुशस्तिभिर्म्मन्दंस्वधीतिभिर्हितः ॥ त्वेऽइषःसन्दंधुर्भूरिवर्पं
सश्चित्रोतंयोवामजांताः १०८ इरज्ज्यन्नंग्ने ॥ प्प्रथयस्वजन्तुभि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुस्म्मेरायोऽअमर्त्त्यं ॥ सदर्शतस्यद्ववपुषोद्विराजसिपूणाक्षिसानुसिक्ष्
तुम् १०९ इष्कुर्त्तारमह्वरस्यं ॥ इष्कुर्त्तारमह्वरस्यप्प्रचेतसक्षयन्तुॅ
राधंसोमुहः ॥ रातिंव्वामस्यंसुभगाम्महीमिषन्दधासिसानुसिॅरयि
म् ११० ऋतावानम्महिषं ॥ व्विश्श्वदर्शतमग्निॅसुम्म्नायंदधिरेपुरो
जनाः ॥ श्रुत्कर्णॅसप्प्रथस्तमन्त्वागिरादैव्यम्मानुषासुगा॥१११॥
आप्प्यायस्व ॥ समेतुतेव्विश्श्वतःसोमवृष्णयम् ॥ भवाव्वाजस्य
सङ्गथे ११२ सन्तें ॥ सन्तुपयांॅसिसमुषन्तुव्वाजाःसंव्वृष्णयान्य
भिमातिषाहः ॥ आप्प्यायमानोऽअमृतायसोमदिविश्श्रवांॅस्यु
त्तमानिधिष्ष्व ११३ आप्प्यायस्व ॥ मदिन्तमसोमव्विश्श्वेभिरॅ



For Private and Personal Use Only

शुभिं÷ ॥ भवांनꣳसुप्प्रथंस्तमुꣳसखांवृधे ११४ आतें ॥ वृत्सोमनो
समत्परमाच्चित्सुधस्त्थांत् ॥ अग्नेत्त्वाङ्कामयागिरा ११५ तुब्भ्यु
न्ताः ॥ तुब्भ्युन्ताऽअंङ्गिरस्तमुव्विश्श्वां÷सुक्षितयꣳपृथंकू ॥ अग्ने
कामांयसेमिरे ११६ अुग्निश्प्प्रियेषुं ॥ अुग्निश्प्प्रियेषुधामंसुका
मोंभुतस्युभद्दंस्य ॥ सुम्म्राडेकोव्विरांजति ११७ [ १६ ] इतिसंहि
तापाठेद्वादशोऽध्याय: १२ मयिगृह्णामिपंचदशध्रुवासिमधुवाताए
कादशकौसम्यकूस्रवंतिनवेमंमाषडपांत्वैकाऽयंपुर:पंचसप्ताष्टापंचा
शत् ॥ मयिंगृह्णामि ॥ मयिंगृह्णाम्म्यग्ग्रेंऽअुग्निंꣳरायस्प्पोषांयसुप्प्र
जास्त्वायंसुवींरुर्यांय ॥ मामुंदेवतांꣳसचन्ताम् १ अपाम्पृष्ठम् ॥ अ

पाम्पृ॒ष्ठमं॑सि॒योनि॑र॒ग्नेः॑स॒मु॒द्रम॒भित॒ऽपिन्व॑मा॒नम् ॥ वर्द्ध॑मानोम॒हाँ॥
ऽआ॒च॒पुष्क॑रे॒दि॒वोमात्र॑या॒वरि॒म्म्णाप्प्र॑थस्व २ ब्रह्म॑ज्ञा॒नम् ॥ ब
ह्म॑ज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्वि॒सीम॒तः॒सु॒रु॒चो॑वे॒नऽआ॑वः ॥ सबु॒ध्न्या॒
ऽउप॒माऽअ॑स्यवि॒ष्ठाः॒सत॒श्च॒योनि॒मस॑त॒श्च॒विव॑ः ३ हि॒र॒ण्य॒ग॒र्भः॒
सम॑वर्त्त॒ताग्रे॑भू॒तस्य॑जा॒तः॒पति॒रेक॑ऽआसीत् ॥ सदा॑धार॒पृ॒थि॒वीन्द्या
मु॒तेमाङ्कस्मै॑दे॒वाय॑ह॒विषा॑विधेम ४ द्र॒प्प्स॒श्च॒स्कन्द॥पृ॒थि॒वीमनु॒द्या
मि॒मञ्च॒योनि॒मनु॒य॒श्च॒पूर्व॑ः ॥ स॒मा॒नंयो॒नि॒मनु॑स॒ञ्चर॑न्तन्द्र॒प्प्सञ्जु॒
हो॒म्म्यनु॑स॒प्त॒हो॒त्राः ५ नमो॑स्तु ॥ स॒र्प्पेभ्यो॒ये॑के॒च॑पृ॒थि॒वीमनु॑ ॥
येऽअ॒न्तरि॑क्षे॒ये॒दि॒वि॒तेभ्य॑ः॒स॒र्प्पेभ्यो॒नम॑ः ॥ ६ ॥ याऽइष॑वः ॥ या

ऽइषंवोयातुधानानांस्येवावनस्पती१ँरनु ॥ येवांवटेषुशेरंतेतेभ्यः
सर्प्पेभ्योनमः ७ येवा । मीरोचनेदिवोयेवासूर्यस्यरश्मिषु ॥ ये
षामप्सुसदस्कृतन्तेभ्यः सर्प्पेभ्योनमः ८ कृणुष्ष्वपाजः ॥ कृ
णुष्ष्वपाजःप्रसितिन्नपृथ्वीँय्याहिराजेवामंवाः ॥ ऽइभेन॥तृष्वी
मनुप्रसितिन्द्रूणानोस्तासिविद्ध्यरक्षसस्तापिष्ठैः ॥ ९ ॥ तवभ्रमा
सः ॥ तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः ॥ तपू
ंष्ष्यग्नेजुह्वापतङ्गानसंन्दितोविसृजविष्ष्वगुल्काः १० प्रतिस्प
शः ॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः
योनोदूरेऽअघशंसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ११ उदग्ने ॥

तिष्टुप्प्रत्यातंनुष्ष्वन्न्युमित्रां॑ ॥ ऽओषतातिग्ममहेने ॥ योनोऽअरां
तिॐसमिधानचक्केनीचातन्धंक्ष्यतसन्नशुष्कंम् १२ ऊर्द्धोभंव ॥
ऊर्द्धोभंवप्प्रतिंविद्ध्याध्युयस्म्मदाविष्कृंणुष्ष्वदैव्यांन्न्यग्ग्ने ॥ अवं
स्थिरातंनुहियातुजूनांजामिमजांमिम्प्रमृंणीहिशत्रूंन् ॥ अग्ग्नेष्ट्वा
तेजंसासादयामि १३ अग्ग्निर्म्मूर्द्धा ॥ दिवःककुत्पतिंःपृथिव्याअ
यम् ॥ अपाᳬरेताᳬसिजिन्वति ॥ इन्द्रंस्यत्त्वौजंसासादयामि १४
भुवोयज्ञस्यं ॥ भुवोयज्ञस्यरजंसश्चनेतायत्रांनियुद्भिःसचंसेशिवा
भिंः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षांजिह्वामंग्ग्नेचकृषेहव्यवाहंम् १५ [१५]
ध्रुवासि ॥ धरुणास्तृंताविश्श्वकंर्म्मणा ॥ मात्त्वासमुद्रऽउद्वंधीन्मा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुपर्णोऽस्यंथमानापृथिवीन्दृंऽह १६ प्रजापतिष्ट्वा ॥ सायत्त्वपाम्पृष्ठे
समुद्रस्येमंन् ॥ व्यचस्वतीम्प्रथस्वतीम्प्रथस्वपृथिव्यसि १७ भूर
सि ॥ भूरसिभूमिरस्यदितिरसिविश्श्वधायाविश्श्वस्यभुवनस्यध
र्त्री ॥ पृथिवींयच्छपृथिवीन्दृंऽहपृथिवीम्माहिंऽसीः १८विश्श्वस्म्मै
प्प्राणाय ॥ विश्श्वस्म्मैप्प्राणायापानायव्यानायोदानायप्प्रतिष्ठायै
चरित्त्राय ॥ अग्निष्ट्वा । भिपातुमह्यास्वस्त्याछर्दिषाशन्तमेनतयादेव
तयाङ्गिरस्वद्ध्रुवासीद १९ काण्डात्काण्डात्प्ररोहन्ती ॥ परुषःपरुष
स्प्परि ॥ एवानोदूर्वेप्प्रतनुसहस्रेणशतेनच २० याशतेन ॥ प्प्रतनो
षिसहस्रेणविरोहसि ॥ तस्यास्तेदेवीष्टकेविधेमहविषावयम् २१ या

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तेँ ॥ ऽअग्नेसूर्य्यैरुचोदिवमातुन्वन्तिरश्मिभिः ॥ ताभिन्नोऽअ
द्यसर्व्वाभीरुचेजनायनस्कृधि २२ यावः ॥ यावोदेवाःसूर्य्येरुचो
गोष्वश्वेषुयारुचः ॥ इन्द्राग्नीताभिःसर्व्वाभीरुचन्नोधत्तबृहस्प
ते २३ विराड्ज्योतिः ॥ विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारय
त् ॥ प्रजापतिष्ट्वासादयतुपृष्ठेपृथिव्याज्ज्योतिष्मतीम्॥ विश्वस्मै
प्राणायापानायव्यानायविश्वञ्ज्योतिर्यच्छ ॥ अग्निष्टेधिपतिस्त
यादेवतयाङ्गिरस्वद्ध्रुवासीद २४ मधुश्च ॥ मधुश्चमाधवश्चवासं
न्तिकावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्ता
मापऽओषधयःकल्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ ये



For Private and Personal Use Only

ऽअुग्नयुःसमंनसोन्तुराद्यावांपृथिवीऽइमे ॥ व्वासंन्तिकावृतूऽअंभि
कल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभिसंविंशन्तुतयांदेवतंयाङ्गिरुस्वद्ध्रुवे
सींदतम् २५ अषांढासि ॥ अषांढासिसहंमानासहुस्वारांतीःसहंस्व
पृतनायुतः ॥ सुहस्रंव्वीर्य्यांसिसामांजिन्व २६ [ ११ ] मधुव्वातांः॥
मधुव्वाताऽऋतायुतेमधुंक्षरन्तिसिन्धंवः॥माद्ध्वीर्न्नःसुन्त्वोषंधीः २७
मधुनक्तंम् ॥ मधुनक्तंमुतोषसोमधुंमुत्पार्थिवुᳪरजः ॥ मधुद्यौरस्तु
नःपिता २८ मधुंमान्नः ॥ मधुंमान्नोव्वनुस्प्पतिर्म्मधुंमाः ॥ ऽअस्तु
सूर्य्यः ॥ माद्ध्वीर्गावोंभवन्तुनः २९ अुपाङ्गम्भंन् ॥ अुपाङ्गम्भंन्त्सी
दुमात्त्वासूर्य्योभितांप्प्सीन्माग्निर्वैश्श्वानुरः ॥ अच्छिन्नपत्राःप्प्र

जाऽअनुवीक्षस्वानुत्त्वादिव्वयावृष्टिःसचताम् ३० त्रीन्त्समुद्रान् ॥ त्री
न्त्समुद्रान्त्समसृपत्स्वर्ग्गानपाम्पतिर्वृषभऽइष्टकानाम् ॥ पुरीषंवसा
नःसुकृतस्यलोकेतत्रगच्छयत्रपूर्वेपरेताः ३१ महीद्यौःपृथिवीचन
ऽइमंयज्ञम्मिमिक्षताम्॥पिपृतान्नोभरीमभिः॥ ३२ विष्णोःकर्म्मा
णि॥पश्यतयतोव्रतानिपस्पशे॥इन्द्रस्ययुज्यःसखा ३३ ध्रुवासि ॥
धरुणेतोजज्ञेप्रथममेभ्योयोनिभ्योऽअधिजातवेदाः ॥ सगायत्र्या
त्रिष्टुभानुष्टुभाचदेवेभ्योहव्यंवहतुप्रजानन् ३४ इषेराये ॥ रमं
स्वसहसेद्युम्नऽऊर्जेऽअपत्याय ॥ सम्म्राडसिस्वराडसिसारस्वतौत्वो
त्सौप्प्रावताम् ३५ अग्नेयुक्ष्व ॥ अग्नेयुक्ष्वाहियेतवाश्श्वासोदेवसा ८२

धवं÷ ॥ अरंबहन्तिमन्न्यवे ३६ सुक्ष्वाहि ॥ देंवहूतमाः ॥ ऽअश्वाँ
ः ॥ ऽअग्नेरथीरिंव ॥ निहोतापूर्व्यःसंदः ३७ [ ११ ] सुम्म्यक्स्स्र
वन्ति ॥ सरितोनधेनाऽअन्तर्हृदामनसापूयमानाः ॥ घृतस्यधारा
अभिचांकशीमिहिरण्ययोंवेतसोमद्ध्येऽअग्नेः ॥ ३८ ऋचेत्त्वा ॥
रुचेत्त्वांभासेत्वाज्ज्योतिषेत्वा ॥ अभूदिदंविश्श्वंस्यभुवनस्यवाजि
नमग्नेर्वैश्श्वानरस्यंच ३९ अग्निर्ज्ज्योतिषा ॥ अग्निर्ज्ज्योतिषा
ज्ज्योतिष्म्मान्रुक्मोवर्च्चसावर्च्चस्वान् ॥ सहस्रदाऽअसिसहस्रायत्त्वा
४० आदित्यङ्गर्भम् ॥ आदित्यङ्गर्भम्पयंसासमंङ्धिसहस्रस्यप्प्रति
मांविश्श्वरूपम् ॥ परिवृङ्धिहरंसामाभिमंᳪस्त्थाःशतायुषङ्कृणुहि

चीयमानः ४१ वातस्यजूतिं ॥ वरुणस्यनाभिमश्वञ्जज्ञानᳪंसरि
रस्यमध्ये ॥ शिशुन्नदीनाᳪंहरिमद्रिबुध्नमग्नेमाहिᳪंसीःपरमेव्यो
मन् ४२ अजस्रमिन्दुम् ॥ अजस्रमिन्दुमरुषम्भुरण्युमग्निमीडेपूर्व
चित्तिन्नमोभिः ॥ सपर्वभिर्ऋतुशःकल्पमानोगाम्माहिᳪंसीरदिति
विराजम् ४३ वरूत्रीन्त्वष्टुः ॥ वरूत्रीन्त्वष्टुर्वरुणस्यनाभिमविञ्ज
ज्ञानाᳪंरजसःपरस्मात् ॥ महीᳪंसाहस्रीमसुरस्यमायामग्नेमाहि
ᳪंसीःपरमेव्योमन्४४ योऽअग्निः ॥ योऽअग्निरग्नेरध्यजायतशो
कात्पृथिव्याऽउतवादिवस्परि ॥ येनप्रजाविश्वकर्म्माजजानत ८३
मग्नेहेडःपरितेवृणक्तु ४५ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगाद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नीकुश्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरि
क्ष ँ सूर्यऽआत्माजगतस्तस्थुषश्च ४६ [ ९ ] इमम्मा ॥ हि ँसी
र्द्विपादम्पशु ँसहस्राक्षोमेधायचीयमानः ॥ मयुम्पशुम्मेधमग्नेजुष
स्वतेनचिन्वानस्तन्वोनिषीद ॥ मयुन्तेशुगृच्छतुयन्द्विष्मस्तन्तेशु
गृच्छतु ४७ इमम्मा ॥ हि ँसीरेकशफम्पशुङ्कनिक्रदंवाजिनंवाजिने
षु ॥ गौरमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥ गौरन्ते
शुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ४८ इम ँसाहस्रम् ॥ इम ँसाहस्र ँ
शतधारमुत्संव्यच्यमान ँसरिरस्यमध्ये ॥ घृतन्दुहानामदितिञ्जना
याग्नेमाहि ँसीःपरमेव्योमन् ॥ गवयमारण्यमनुतेदिशामितेनचि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्वानस्तन्वोनिषीद ॥ गवयन्तेशुगृंछतुयद्विष्मस्तन्तेशुगृंछतु ४९
इममूर्णायुं ॥ वरुणस्यनाभिन्त्वचम्पशुनान्द्विपदाञ्चतुष्पदाम् ॥
त्वष्टुःप्रजानाम्प्रथमञ्जनित्रमग्नेमाहिंसीः परमेव्योमन् ॥ उष्ट्रमा
रण्यमनुंतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥ उष्ट्रन्तेशुगृंछतुय
न्द्विष्मस्तन्तेशुगृंछतु ५० अजोहि ॥ अजोह्यग्नेरजनिष्टशोका
त्सोऽअपश्यज्जनितारमग्रे ॥ तेनदेवादेवतामग्रमायँस्तेनरोहमाय
न्नुपमेद्ध्यांसः ॥ शरभमारण्यमनुंतेदिशामितेनचिन्वानस्तन्वोनि
षीद ॥ शरभन्तेशुगृंछतुयन्द्विष्मस्तन्तेशुगृंछतु ५१ त्वंयविष्ठ ॥ ८४
दाशुषोनॄःपाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ५२ [ ६ ] अ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पान्त्वां ॥ अपान्त्वेमंन्त्सादयाम्म्युपान्त्वोद्मंन्त्सादयाम्म्युपान्त्वा
भस्म्मंन्त्सादयाम्म्युपान्त्वाज्ज्योतिंषिसादयाम्म्युपान्त्वायंनेसादया
म्म्यर्णवेत्त्वासदंनेसादयामिसमुद्रेत्त्वासदंनेसादयामिसरिरेत्त्वासदं
नेसादयाम्म्युपान्त्वाक्षयेंसादयाम्म्युपान्त्वासधिंषिसादयाम्म्युपा
न्त्वासदंनेसादयाम्म्युपान्त्वांसुधस्त्थेंसादयाम्म्युपान्त्वायोनौंसाद
याम्म्युपान्त्वापुरींषेसादयाम्म्युपान्त्वापाथंसिसादयामिगायत्त्रेण
त्त्वाछन्दंसासादयामित्रैष्टुंभेनत्त्वाछन्दंसासादयामिजागंतेनत्त्वाछ
न्दंसासादयाम्म्यानुंष्टुभेनत्त्वाछन्दंसासादयामिपाङ्क्तेनत्त्वाछन्दंसा
सादयामि ५३ [ १ ] अयम्पुरः ॥ अयम्पुरोभुवस्तस्यंप्प्राणोभौ

For Private and Personal Use Only

वायुर्नोव्वसन्तःप्प्राणायनोगायत्रीव्वासन्तीगायत्र्यैगायत्रङ्गायत्रादु
पाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतोरथन्तरंव्वसिष्ठऽऋषिः प्प्रजापतिगृहीत
यात्त्वयाप्प्राणङ्गृह्णामिप्प्रजाभ्यः ५४ अयन्दक्षिणा ॥ विश्वक
र्म्मातस्यमनोव्वैश्वकर्म्मणङ्ग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभः
स्वारꣳस्वारादन्तर्यामोन्तर्यामात्पञ्चदशःपञ्चदशाद्बृहद्बृहतोभरद्वाजऽऋ
षिःप्प्रजापतिगृहीतयात्त्वयामनोगृह्णामिप्प्रजाभ्यः ५५ अयम्पु
श्चात् ॥ अयम्पश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंव्वर्षाश्चा
क्षुष्योजगतीव्वार्षीजगत्याऽऋक्सममृक्समाच्छुक्रःशुक्रात्स
प्तदशःसप्तदशाद्वैरूपञ्जमदग्निरृषिः प्प्रजापतिगृहीतयात्त्वयाच

क्षुर्गृह्णामिप्प्रजाभ्यः ५६ इदमुत्तरात् ॥ इदमुत्तरात्त्स्वस्तस्यश्श्रो
त्रꣳसौवꣳशरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थीमन्थिनऽएक
विꣳशऽएकविꣳशाद्वैराजंविश्श्वामित्रऽऋषिः प्प्रजापतिगृहीतयात्त्व
याश्श्रोत्रंगृह्णामिप्प्रजाभ्यः ५७ इयमुपरिमतिस्तस्यैवाङ्माऽत्त्याहे
मन्तोवाच्यःपङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निधनवतऽआग्रयणऽआ
ग्रयणात्त्रिणवत्त्रयस्त्रिꣳशौत्रिणवत्त्रयस्त्रिꣳशाभ्याꣳशाक्वररैवतेवि
श्श्वकर्म्मऽऋषिः प्प्रजापतिगृहीतयात्त्वयावाचंगृह्णामिप्प्रजाभ्यो
लोकन्ताऽइन्द्रम् ५८ [५] इतिश्रीवाजसनेयसंहितायांत्रयोदशो
ऽध्यायः १३ ध्रुवक्षितिःपट्सजूर्कर्तुभिर्मूर्द्धावयोर्द्विकाविंद्राग्नीआ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





युमैंषट्कावाशुस्त्रिवृदेकाग्नेर्भागोस्येकयाचतुष्कावष्टावेकत्रिँशत्॥
ध्रुवक्षितिर्ध्रुवयोनिः ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवंयोनिमासी
दसाधुया ॥ उख्यस्यकेतुम्प्रथमञ्जुषाणाश्विनाध्वर्यूसादयतामि
हत्वा १ कुलायिनीघृतवती ॥ कुलायिनीघृतवतीपुरन्धिःस्योने
सीदसदनेपृथिव्याः ॥ अभित्वारुद्रावसवोगृणन्त्विमाब्रह्मपीपिहि
सौभगायाश्विनाध्वर्यूसादयतामिहत्वा २ स्वैर्दक्षैः ॥ स्वैर्दक्षैर्दक्ष
पितेहसीददेवानांसुम्नेबृहतेरणाय ॥ पितेवैधिसूनवआसुशेवा
स्वावेशातन्वासंविशस्वाश्विनाध्वर्यूसादयतामिहत्वा ३ पृथिव्याः ८६
पुरीषम् ॥ पृथिव्याःपुरीषमस्यप्सोनामतान्त्वाविश्वेअभिगृण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तुदेवा ३ ॥ स्तोमंपृष्ठाघृतवंतीहसींदप्रजावेदस्मेद्रविणायंजस्वा
श्विनांहूर्य्यूंसांदयतामिहत्वां ४ आदित्यास्त्वा ॥ पृष्ठेसांदयाम्म्य
न्तरिंक्षस्यधर्त्रींविष्टम्भंनींन्दिशामधिपत्नींम्भुवंनानाम् ॥ ऊर्म्मिद्र
प्सोऽअपामंसिविश्वकंर्म्मांतऽऋषिरश्विनांहूर्य्यूंसांदयतामिह
त्वा ५ शुक्रश्च ॥ शुक्रश्चशुचिश्चग्रैष्म्मांवृतूऽअग्नेरंतःश्लेषोसि
कल्पेंतान्द्यावांपृथिवीकल्पंन्तामापऽओषंधयःकल्पंन्तामग्न
यःपृथङ्मज्ज्यैष्ठ्यांयसव्रंताः ॥ येऽअग्नयःसमंनसोन्तराद्यावांपृ
थिवीऽइमे ॥ ग्रैष्म्मांवृतूऽअंभिकल्पंमानाऽइन्द्रंमिवदेवाऽअंभिसं
विंशन्तुतयादेवतंयाङ्गिरस्वद्ध्रुवेसींदतम् ॥ ६ ॥ [ ६ ] सजूर्ऋतुभिः

For Private and Personal Use Only

संहि. सुजूर्विधाभिःसुजूर्देवैःसुजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वानराया पू.अ.
८७ श्विनांध्वर्य्यूसांदयतामिहत्वांसुजूर्ऋतुभिःसुजूर्विधाभिःसुजूर्वसु १४
भिः सुजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वानरायाश्विनांध्वर्य्यूसांदय
तामिहत्वांसुजूर्ऋतुभिःसुजूर्विधाभिःसुजूरुद्रैःसुजूर्देवैर्वयोनाधैर
ग्नयेत्त्वावैश्वानरायाश्विनांध्वर्य्यूसांदयतामिहत्त्वांसुजूर्ऋतुभिः
सुजूर्विधाभिःसुजूरांदित्यैःसुजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वानरा
याश्विनांध्वर्य्यूसांदयतामिहत्वांसुजूर्ऋतुभिःसुजूर्विधाभिः ः सुजू
र्विश्वैर्देवैःसुजूर्देवैर्वयोनाधैरग्नयेत्वावैश्वानरायाश्विनांध्वर्य्यू ८७
सांदयतामिहत्वां ७ प्राणम्मे ॥ पाह्यपानम्मेपाहिव्यानम्मेपाहिच

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षुर्म्मऽउर्व्याविभाहिश्श्रोत्रम्मेश्श्लोकय ॥ अपःपिन्वौषधीर्जिन्व
द्विपादवचतुष्पात्पाहिदिवोवृष्टिमेरय ८ [ २ ] मूर्द्धावयम्प्रजाप
तिश्छन्दःक्षत्रंवयोमयन्दञ्छन्दोविष्टम्भोवयोधिपतिश्छन्दोविश्व
कर्म्मावयम्परमेष्ठीछन्दोबस्तोवयोविबलञ्छन्दोवृष्णिर्वयोविशा
लञ्छन्दःपुरुषोवयस्तन्द्रञ्छन्दोव्याघ्रोवयोनाधृष्टञ्छन्दःसिंहोव
यश्छदिश्छन्दःपष्ठवाड्वयोबृहतीछन्दऽउक्षावयःककुप्छन्दऽऋषभो
वयःसतोबृहतीछन्दोनड्वान्वयः ९ अनड्वान्वयः ॥ पङ्क्तिश्छन्दोधे
र्वयोजगतीछन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दोदित्यवाड्वयोविराट्छन्दःपञ्चा
विर्वयोगायत्रीछन्दस्त्रिवत्सोवयऽउष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. प्प्छन्दोलोकन्ताऽइन्द्रंम् १० [ २ ] इन्द्राग्नीऽअव्व्यंथमानाम् ॥ इ पू.अ.
८८ न्द्राग्नीऽअव्व्यंथमानामिष्टकान्दृꣳहतꣳयुवम् ॥ पृष्ठेनद्यावापृथिवीऽअ १४
न्तरिक्षञ्चव्विबाधसे ११ व्विश्वकर्म्मात्वा ॥ सादयत्त्वन्तरिक्षस्यपृ
ष्ठेव्यचस्वतीम्प्रथस्वतीमन्तरिक्षꣳयच्छान्तरिक्षन्दृꣳहान्तरिक्षम्माहिꣳ
सीः ॥ व्विश्वस्म्मैप्प्राणायापानायव्व्यानायोदानायप्प्रतिष्ठायैचरि
त्राय ॥ व्वायुष्ट्वाभिपातुमह्यास्वस्त्याछर्दिषाशन्तमेनतयादेवतयाङ्गि
रस्वद्ध्रुवासीद १२ शतम् ७०० ॥ राड्यसि ॥ राड्यसिप्प्राचीदिग्वि
राडसिदक्षिणादिक्ꣳसम्म्राडसिप्प्रतीचीदिक्ꣳस्वराडस्युदीचीदिग ८८
धिपत्न्यसिबृहतीदिक् १३ व्विश्वकर्म्मात्वा ॥ सादत्वन्तरिक्षस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्श्वंस्म्मैप्प्राणायांपानायंव्यानायुव्विश्श्वु
ञ्ज्योतिंर्य्यच्छ ॥ व्वायुष्ट्टेधिंपतिस्तयांदेवतंयाङ्गिरुस्वध्रुवासींद १४ न
भंश्च्च । नभुस्यश्च्चुव्वाषिंकावृतूऽअुग्ग्नेरंन्तःश्लुेषोसिकल्प्पेतान्द्यावां
पृथिवीकल्प्पंन्तामापुऽओषंधयुःकल्प्पंन्तामुग्ग्नयुःपृथुङ्ममुज्ज्यै
ष्ठ्यांयसव्व्रताः ॥ येऽअुग्ग्नयुःसमंनसोन्तुराद्यावांपृथिवीऽइमे ॥ व्वा
षिंकावृतूऽअंभिकल्प्पंमानाऽइन्द्रंमिवदेवाऽअंभिसंव्विशन्तुतयांदेव
तंयाङ्गिरुस्वध्रुवेसींदतम् १५ इषश्च्चं ॥ इषश्च्चोर्ज्जश्च्चंशारदावृतूऽअु
ग्ग्नेरंन्तःश्लुेषोसिकल्प्पेतान्द्यावांपृथिवीकल्प्पंन्तामापुऽओषंधयुः
कल्प्पंन्तामुग्ग्नयुःपृथुङ्ममुज्ज्यैष्ठ्यांयुसव्व्रंताः ॥ येऽअुग्ग्नयुःसमंनं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोन्तराद्यावापृथिऽवीइमे ॥ शारदावृतूऽअभिकल्पमानाऽइन्द्रमि
वदेवाऽअभिसंविंशन्तुतयादेवतयाङ्गिरस्वध्रुवेसीदतम् १६ [ ६ ]
आयुर्म्मे ॥ पाहिप्प्राणम्मेपाह्यपानम्मेपाहिव्यानम्मेपाहिचक्षुर्म्मे
पाहिश्श्रोत्रम्मेपाहिवाचम्मेपिन्वमनोमेजिन्वात्मानम्मेपाहि
ज्ज्योतिर्म्मेयच्छ १७ माछन्द÷ ॥ प्प्रमाछन्द÷प्प्रतिमाछन्दोऽअस्त्री
वयश्छन्द÷पङ्क्तिश्छन्दऽउष्णिक्छन्दोबृहतीछन्दोनुष्टुप्छन्दोविरा
ट्छन्दोगायत्रीछन्दस्त्रिष्टुप्छन्दोजगतीछन्द÷पृथिवीछन्द÷ १८ पृथि
वीछन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दःसमाश्छन्दोनक्षत्राणिछन्दोवाक्छ
न्दोमनश्छन्द÷कृषिश्छन्दोहिरण्यञ्छन्दोगौश्छन्दोजाछन्दोश्श्व



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्छन्दः १९ अग्निर्देवता ॥ अग्निर्देवतावातोदेवतासूर्य्योदेवताच
न्द्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्श्वेदे
वादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता २० मूर्द्धासि ॥ मूर्द्धा
सिराध्रुवासिधरुणाधर्त्र्यसिधरणी ॥ आयुषेत्त्वावर्च्चसेत्त्वाकृष्यै
त्वाक्षेमायत्वा ॥ २१ ॥ यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसियमनीध्रुवा
सिधरित्री ॥ इषेत्त्वोर्ज्जेत्त्वारय्यैत्वापोषायत्वालोकन्ताऽइन्द्रम् ॥
२२ [ ६ ] आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तःपञ्चदशोव्योमासप्तदशो
धरुणऽएकविꣳशःप्रतूर्त्तिरष्टादशस्तपोनवदशोभीवर्त्तःसविꣳशोवर्च्चो
द्वाविꣳशःसम्भरणस्त्रयोविꣳशोयोनिश्चतुर्विꣳशोगर्भाःपञ्चविꣳश

For Private and Personal Use Only

संहि. ऽओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठात्रयस्त्रिंशो ब्रध्नस्य विष्टपं च पू.अ.

१० तुस्त्रिंशो नाकः षट्त्रिंशो विवर्त्तोऽष्टाचत्वारिंशो धर्त्रं चतुष्टोमः २३[१] १४

अग्नेर्भागः ॥ अग्नेर्भागोसि दीक्षायाऽआधिपत्यम्ब्रह्मस्पृतन्त्रि

वृत्स्तोमऽइन्द्रस्य भागोसि विष्णोराधिपत्यङ्क्षत्रं स्पृतम्पञ्चदशस्तो

मो नृचक्षसाम्भागोसि धातुराधिपत्यञ्जनित्रं स्पृतं सप्तदशस्तोमो

मित्रस्य भागोसि वरुणस्याधिपत्यन्दिवो वृष्टिर्वातस्पृतऽएकविंश

स्तोमो वसूनाम्भागः २४ वसूनाम्भागोसि रुद्राणामाधिपत्यञ्चतु

ष्पात्स्पृतञ्चतुर्विंशस्तोमःऽआदित्यानाम्भागोसि मरुतामाधिप १०

त्यङ्गर्भास्पृताः पञ्चविंशस्तोमो दित्यै भागोसि पूष्णऽआधिपत्य

मोजेस्पृतन्त्रिणवस्तोमोंदेवस्यंसवितुर्भागोसिबृहस्पतेराधिपत्य
ᳪसमीचीर्दिशंस्पृताश्चंतुष्टोमस्तोमोषवानाम्भागः २५षवानाम्भा
गोस्ययंवानामाधिपत्यम्प्रजास्पृताश्चंतुश्चत्वारि ᳪ शस्तोमंऽऋभू
णाम्भागोसिविश्वेषान्देवानामाधिपत्यम्भूतᳪस्पृतन्त्रंयस्त्रि ᳪ श
स्तोमः सहश्च २६ सहश्च ॥ सहस्यश्चहैमन्तिकावृतूऽअग्नेरन्तः
श्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्प
न्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसोन्त
राद्यावापृथिवीऽइमे ॥ हैमन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिवदे
वाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् २७ [ ४ ] एकं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यास्तुवत ॥ प्प्रजाऽअंधीयन्तप्प्रजापंतिरधिंपतिरासीतिसृभिंरस्तु
वतब्ब्रह्मांसृज्ज्यतब्ब्रह्मंणस्प्पतिरधिंपतिरासीत्पञ्चभिंरस्तुवतभूता
न्न्यंसृज्ज्यन्तभूतानाम्पतिरधिंपतिरासीत्सुप्पभिंरस्तुवतसप्पऽऋष
योंसृज्ज्यन्तधाताधिंपतिरासीन्नवभिंरस्तुवत २८ नुवभिंरस्तुवत
॥ पितरोंसृज्ज्यन्तादिंतिरधिंपत्क्यासींदेकादुशभिंरस्तुवतऽऋतवोंसृ
ज्ज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्रयोदुशभिंरस्तुवतुमासांऽअसृज्ज्य
न्तसंव्वत्सुरोधिंपतिरासीत्पञ्चदुशभिंरस्तुवतक्षुत्रमंसृज्ज्युतेन्द्रोधिंप
तिरासीत्सप्पदुशभिंरस्तुवतग्ग्राम्म्याः पुशवोंसृज्ज्यन्तबृहुस्प्पतिर ९१
धिंपतिरासीन्नवदुशभिंरस्तुवत २९ नुवदुशभिंरस्तुवत ॥ शूद्रार्य्यावं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सृज्यन्तामहोरात्रे ऽ अधिपत्नी ऽआस्तामेकविं ६ शत्यास्तुवतैकश
फाःपशवोसृज्यन्तवरुणोधिपतिरासीत्त्रयोविं ६ शत्यास्तुवतक्षुद्राः
पशवोसृज्यन्तपूषाधिपतिरासीत्पञ्चविं६शत्त्यास्तुवतारण्याः पश
वोसृज्यन्तवायुरधिपतिरासीत्सप्तविं ६ शत्यास्तुवतद्यावापृथिवी
ध्यैतांवसवोरुद्राऽआदित्या ऽअनुव्यायुँस्त ऽएवाधिपतय ऽआसन्नव
विं६शत्त्यास्तुवत ३० नवविं६शत्यास्तुवत ॥ वनस्पतयोसृज्य
न्तसोमोधिपतिरासीदेकत्रिं ६ शतास्तुवतप्रजाऽअसृज्यन्तयवा
श्चायवाश्चाधिपतयऽआसँस्त्रयस्त्रिं६शतास्तुवतभूतान्यशाम्यन्प्र
जापतिःपरमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ३१ [ ४ ] इतिसंहि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. तायांचतुर्दशोध्यायः १४ अग्नेजातान्पंचरश्मिनासत्यायचतस्रो पू.अ.
१२ राइयस्ययंपुरःपंचकावग्निर्मूर्द्धैकोनत्रिँ शद्येनऽऋषयोष्टौतपश्चनव १५
सप्तपंचषष्टिः ॥ अग्नेजातान् ॥ अग्नेजातान्प्रणुदानःसुपत्क्रान्प्र
त्त्यजातान्नुदजातवेदः ॥ अधिनोब्रूहिसुमनाऽअहेडँस्तवंस्यामुशर्म्मँ
स्त्रिवरूथऽउद्भौ ॥ १ ॥ सहसाजातान् ॥ सहसाजातान्प्रणुदानःसु
पत्क्रान्प्रत्यजाताञ्जातवेदोनुदस्व ॥ अधिनोब्रूहिसुमनस्यमानोव
यँस्यामप्रणुदानःसुपत्क्रान् २ षोडशीस्तोमं ÷ ॥ षोडशीस्तोम
ऽओजोद्रविणञ्चतुश्चत्वारिँशस्तोमोवर्चोद्रविणम् ॥ अग्नेःपुरीष १२
मस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवं

For Private and Personal Use Only

तीहसींदप्रजावंदुरस्मेद्रविणायंजस्व ३ एवश्छन्दः ॥ एवश्छन्दोव
रिवश्छन्दः शम्भुश्छन्दःपरिभूश्छन्दऽआछच्छन्दोमनश्छन्दोव्यच
श्छन्दःसिन्धुश्छन्दःसमुद्रश्छन्दःसरिरञ्छन्दःककुप्छन्दस्त्रिककु
प्छन्दःकाव्यञ्छन्दोऽअङ्कुपञ्छन्दोक्षरपङ्क्तिश्छन्दःपदपङ्क्तिश्छन्दो
विष्टारपङ्क्तिश्छन्दःक्षुरोभ्रज्जश्छन्दऽआछच्छन्दःप्रछच्छन्दः ४ आ
छच्छन्दःप्रछच्छन्दः ॥ संयच्छन्दोवियच्छन्दोबृहच्छन्दोरथन्तरञ्छन्दो
निकायश्छन्दोविवधश्छन्दोगिरश्छन्दोभ्रजश्छन्दः संस्तुप्छ
न्दोनुष्टुप्छन्दऽएवश्छन्दोवरिवश्छन्दोवयश्छन्दोवयस्कृछन्दोविष्प
र्द्धाश्छन्दोविशालञ्छन्दश्छदिश्छन्दोदूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ङ्काङ्कुच्छन्दं ÷ ५ [ ५ ] रुश्मिनांसुत्यायं ॥ सुत्त्यांजिंन्वुप्प्रेतिं
नाधर्म्मणाधर्म्मंजिन्वान्वित्यादिवादिवंजिन्वसुन्धिनान्तरिक्षेणा
न्तरिंक्षजिन्वप्प्रतिधिनांपृथिव्यापृथिवींजिन्वविष्टम्भेनुवृष्ट्यावृष्टिं
जिन्वप्प्रवयान्हाहर्जिन्वानुयाराज्यारात्रींजिन्वोशिजावसुंभ्यो
वसूंजिन्वप्प्रकेतेनादित्येभ्यं ऽआदित्त्यांजिंन्वुतन्तुंनाराय ÷ ६ त
न्तुंनारायस्प्पोषेणरायस्प्पोषंजिन्वस ६ सुर्प्पेणंश्श्रुतायेश्श्रुताजिं
न्वैडेनौषंधीभिरोषंधीर्जिन्वोत्तुमनंतनूभिंस्तनूर्जिन्ववयोधसाधीं
तेनाधींताजिन्वाभिजितातेजंसातेजोंजिन्व ७ प्रतिपदंसि॥प्प्रतिपदें ९२
त्वानुपदंस्यनुपदेंत्वासुम्पदंसिसुम्पदेंत्वातेजोंसितेजसेत्वात्रिवृदंसि८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिवृदसि ॥ त्रिवृतेत्वाप्प्रवृदसिप्प्रवृतेत्वाव्विवृदसिव्विवृतेत्वासवृदसि सुवृतेत्वाक्कमोस्याक्कमायत्वासङ्क्रमोसिसङ्क्रमायत्वोत्क्रमोस्युत्क्रमा युत्वोत्क्रान्तिरस्युत्क्रान्त्यैत्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्व ९ [ ४ ] राड्यं सि॥ राड्यंसिप्प्राचीदिग्वसवस्तेदेवाऽअधिपतयोग्निर्हेतीनाम्प्रति धर्त्तात्रिवृत्त्वास्तोमं ÷पृथिव्व्याᳪश्श्रयत्वाज्ज्यमुक्थमव्व्यथायैस्तभ्ना तुरथन्तर ६ सामप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवे षुदिवोमात्रयावरिम्म्णाप्प्रथन्तुविधर्त्ताचायमधिपतिश्श्चतेत्त्वासर्व्वे संविदानानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु १० व्विराडसि व्विराडसिदक्षिणादिग्ग्रुद्रास्तेदेवाऽअधिपतय ऽइन्द्रोहेतीनाम्प्रतिधर्त्ता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पंञ्चदशस्त्वास्तोमं ÷ पृथिव्याᳬंश्रयतुप्रउगमुक्थमव्यथायैस्तभ्ना
तुबृहत्सामप्रतिष्ठित्या ऽ अन्तरिक्ष ऽऋषयस्त्वाप्रथमजादेवेषुदिवो
मात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदा
नानाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु ११ सम्राडसि॥प्र
तीचीदिगादित्यास्तेदेवा ऽ अधिपतयोवरुणोहेतीनाम्प्रतिधर्त्तासप्त
दशस्त्वास्तोमं÷पृथिव्याᳬंश्रयतुमरुत्वतीयमुक्थमव्यथायैस्तभ्नातु
वैरूपᳬंसामप्रतिष्ठित्या ऽअन्तरिक्षऽऋषयस्त्वाप्रथमजादेवेषुदिवो
मात्रयावरिम्णाप्रथन्तुविधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदाना
नाकस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु १२ स्वराडसि ॥ स्वरा



For Private and Personal Use Only

डुस्युदीचीदिङ्मुरुतंस्तेदेवाऽअधिपतयुःसोमोहेतीनाम्प्रतिधुर्तैकविँ
ᳪशस्त्वास्तोमः पृथिव्याᳪश्रयतुनिष्केवल्यमुक्थमथव्यंथायैस्तभ्ना
तुवैराजा ᳪ सामुप्प्रतिष्ठित्याऽअन्तरिक्षुऽऋषंयस्त्वाप्प्रथमुजादेवेषु
दिवोमात्रंयावरिम्म्णाप्प्रंथन्तुविधुर्ताचायमधिपतिश्चतेत्त्वासर्वेसं
विदानानाकंस्यपृष्ठेस्वर्गेलोकेयजमानञ्चसादयन्तु १३ अधिपत्क्वय
सि ॥ बृहतीदिग्विश्वेतेदेवाऽअधिपतयोबृहस्पतिर्हेतीनाम्प्रति
धुर्तात्रिणवत्रयस्त्रिᳪशौत्त्वास्तोमौपृथिव्याᳪश्रयताँवैश्वदेवाग्नि
मारुतेऽउक्थेऽअव्यंथायैस्तभ्नीता ᳪ शाक्वररैवतेसामंनीप्प्रतिष्ठित्या
ऽअन्तरिक्षुऋषंयस्त्वाप्प्रथमुजादेवेषुंदिवोमात्रंयावरिम्म्णाप्रंथन्तु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृष्ठेस्वर्गेलो
केयजमानञ्चसादयन्तु १४ [ ५ ] अयम्पुरः ॥ अयम्पुरोहरिकेशः
सूर्य्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्चसेनानीग्ग्रामण्यौ ॥ पुञ्जि
कस्थलाचक्रतुस्थलाचाप्सरसौदङ्क्ष्णवः पशवोहेति पौरुषेयोव
धःप्प्रहेतिस्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोय
श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः १५ अयन्दक्षिणा ॥ विश्वकर्म्मात
स्यरथस्वनश्चरथेचित्रश्चसेनानीग्ग्रामण्यौ ॥मेनकाचसहजन्या
चाप्सरसौयातुधानाहेतीरक्षांसिप्प्रहेतिस्तेभ्योनमोऽअस्तुतेनो
वन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः १६



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयम्पश्चात् ॥ अयंपश्चाद्विश्वव्व्यचास्तस्यरथप्प्रोतश्चासमर
थश्चसेनानीग्ग्रामण्ण्यौ ॥ प्रम्म्लोचन्तीचानुम्म्लोचन्तीचाप्प्सर
सौव्व्याग्घ्राहेतिःसप्पाःप्प्रहेतिस्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृड
यन्तुतेषन्द्विष्ष्मोषश्चनोद्वेष्टितमेषाजम्भेदध्मः १७ अयमुत्तरात् ॥ अ
यमुत्तरात्संषद्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्ण्यौ ॥
विश्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेतिस्तेब्भ्योनमो
ऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेषन्द्विष्ष्मोषश्चनोद्वेष्टितमेषाजम्भेद
दध्मः १८ अयमुपरि ॥ अयमुपर्य्यर्व्वाग्वसुस्तस्यसेनजिच्चसुषे
णश्चसेनानीग्ग्रामण्ण्यौ ॥ उर्व्वशीचपूर्व्वचित्तिश्चाप्प्सरसावव्वस्फू

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्जन्हेतिर्विद्युत्महेतिस्तेभ्योनमो ऽ अस्तुतेनोवन्तुतेनोमृडयन्तुतेय
न्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः १९ [ ५ ] अग्निर्मूर्द्धा ॥
दिवः ककुत्पतिः पृथिव्या ऽअयम् ॥ अपाᳬरेताᳬसिजिन्वति २०
अयमग्निः ॥ सहस्रिणोवाजस्यशतिनस्पतिः ॥ मूर्द्धाकवीरयी
णाम् २१ त्वामग्ने ॥ त्वामग्नेपुष्करादध्यथर्वानिरमन्थत ॥ मू
र्ध्नोविश्वस्यवाघतः २२ भुवोयज्ञस्य ॥ भुवोयज्ञस्यरजसश्चने
तायत्रानियुद्भिःसचसेशिवाभिः ॥ दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वा
मग्नेचकृषेहव्यवाहम् २३ अबोद्ध्यग्निः ॥ समिधाजनानाम्प्रति
धेनुमिवायतीमुषासम् ॥ यह्वा ऽ इवप्रवयामुज्जिहानाः प्रभानवः ॥ १६

सिस्रतेनाकमच्छ २४ अवोचामकवये ॥ अवोचामकवयेमेध्याय
वचोवन्दारुंवृषभायवृष्णे ॥ गविष्ठिरोनमसास्तोममग्नौ दिवीवरुक्म
मुरुव्यञ्चमश्रेत् २५ अयमिह ॥ प्रथमोधायिधातृभिर्होतायजि
ष्ठोऽअध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वं
विशेविशे २६ जनस्यगोपाः ॥ जनस्यगोपाऽअजनिष्टजागृविर
ग्निःसुदक्षःसुवितायनव्यसे ॥ घृतप्रतीकोबृहतादिविस्पृशाद्युमद्वि
भातिभरतेभ्यःशुचिः २७ त्वामग्ने ॥ त्वामग्नेऽअङ्गिरसोगुहाहित
मन्वविन्दञ्छिश्रियाणंवनेवने ॥ सजायसेमथ्यमानःसहोमहत्वा
माहुःसहसस्पुत्रमङ्गिरः २८ सखायःसम् ॥ सखायःसंवःसम्यञ्च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. श्वमिषुꣳस्तोमंश्वाग्नये ॥ वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसहस्वते २९ पू.अ.
५७ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेविश्श्वान्यर्य्यꣳआ ॥ इडस्पदे १९
समिद्ध्यसेसनोवसून्याभर ३० त्वाश्विन्नश्श्रवस्तम ॥ हवन्तेविक्षु
जन्तवः ॥ शोचिष्केशम्पुरुप्प्रियाग्नेहव्यायवोढवे ३१ एनावः ॥ ए
नावोऽअग्निन्नमंसोर्ज्जोनपातमाहुवे ॥ प्रियश्चेतिष्ठमरतिꣳस्वध्वरंवि
श्श्वस्यदूतममृतम् ३२ विश्श्वस्यदूतम्॥विश्श्वस्यदूतममृतंविश्श्व
स्यदूतममृतम् ॥ सयोजतेऽअरुषाविश्श्वभोजसासदुद्द्रवत्स्वाऽहुतः
३३ सदुद्द्रवत् ॥ सदुद्द्रवत्स्वाऽहुतःसदुद्द्रवत्स्वाऽहुतः ॥ सुब्रह्मायज्ञः १७
सुशमीवसूनान्देवꣳराधोजनानाम् ३४ अग्नेवाजस्य ॥ अग्नेवा

जंस्युगोमंतुऽईशानःसहसोयहो ॥ अस्मेधेहिजातवेदोमहिश्श्रवंः
३५ सऽइधानः ॥ सऽइधानोवसुंष्कविरग्निरीडेन्योगिरा॥रेवदस्म
भ्यंपुर्वणीकदीदिहि ३६ क्षपोराजन ॥ क्षपोराजन्नुतत्मनाग्ने
वस्तोरुतोषसंः ॥ सतिग्मजम्भरक्षसोदहप्रति ३७ भद्रोनंः ॥ भ
द्रोनोऽअग्निराहुतोभद्रारातिःसुंभगभद्रोऽअंध्वरः ॥ भद्राऽउतप्रशं
स्तयः ३८ भद्राऽउत ॥ प्रशंस्तयोभद्रम्मनंःकृणुष्ववृत्रतूर्ये ॥ ये
नांसमत्सुंसासहंः ३९ येनांसमत्सु ॥ सासहोवंस्थिरातंनुहिभूरिश
र्द्धताम ॥ वनेमांतेऽअभिष्टिभिः ४० अग्निन्तम ॥ अग्निन्तम्मं
न्येयोवंसुरस्तंयंयन्तिधेनवंः ॥ अस्तमर्वन्तऽआशवोस्तन्नित्यां

सोवाजिनुऽइषंᳫंस्तोतृभ्युऽआभंर ४१ सोऽअग्निः ॥ सोऽअ
ग्निरुर्योवसुंर्गृणेसंरुयमायन्तिधेनवं÷ ॥ समर्वन्तोरघुद्रुवःसᳫंसुंजा
तासं÷सूरयुऽइषंᳫंस्तोतृभ्युऽआभंर ४२ उभेसुंश्चन्द्र ॥ सुर्पिषो
दर्वीश्रीणीषऽआसनि ॥ उतोनुऽउत्पुंपूर्र्याऽउक्थेषुंशवसस्पतुऽइ
षंᳫंस्तोतृभ्युऽआभंर ४३ अग्नेतम् ॥ अग्नेतमुद्याश्वंन्नस्तोमैः
क्रतुन्नभुद्रᳫंहृंदिस्पृशम् ॥ ऋद्ध्यामांतुऽओहैंः ४४ अधाहि ॥ अधा
ह्यग्नेक्रतोर्भुद्रस्युदक्षंस्यसाधोः ॥ र्थीर्ऋतस्यंबृहुतोबभूथ ४५
एभिर्न्नं÷॥ एभिर्न्नोऽअर्क्कैर्भवांनोऽअर्वाङ्स्वुर्णज्योतिं÷॥अग्नेवि
श्वेभिःसुमनाऽअनींकैः ४६ अग्निᳫंहोतांरम् ॥ अग्निᳫंहोतांर १८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्मन्न्येदास्त्वंन्तंवसुꣳसूनुꣳसहंसोजातवेदसंविप्प्रन्नजातवेदसम् ॥ य
ऽऊर्द्ध्वयास्वद्ध्वरोदेवोदेवाच्च्यांकृपा ॥ घृतस्यविब्भ्राष्टिमनुवष्टिशोचि
षाजुह्वानस्यसर्प्पिषः॥४७अग्नेत्वम्॥अग्नेत्वन्नोऽअन्तमऽउतत्राता
शिवोभवावरूत्थ्यः ॥ वसुरग्निर्वसुश्श्रवाऽअच्छानक्षिद्युमत्तमꣳरयि
न्दाः॥तन्त्वाशोचिष्ठदीदिवःसुम्म्नायनूनमीमहेसखिब्भ्यः॥४८[२९]
येनऽऋषयः ॥ येनऽऋषयस्तपसासत्रमायन्निन्धानाऽअग्निꣳस्वं
राभरन्तः ॥ तस्मिन्नहन्निदधेनाकेऽअग्निंयमाहुर्म्मनवस्तीर्णवर्हि
षम् ४९ तम्पत्नीभिः ॥ तम्पत्नीभिरनुगच्छेमदेवाःपुत्त्रैर्ब्भ्रातृभिरु
तवाहिरण्यैः ॥ नाकंगृब्भ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चनेदिवः ५० आवाचः ॥ आवाचोमद्ध्वेमरुहद्धुरण्युरयमग्निः
सत्पंतिश्चेकिंतानः ॥ पृष्ठेपृथिव्यानिहितोदविद्युतदधस्पदङ्कणुतांग्ये
पृतन्यवं÷ ५१ अयमग्निः ॥ अयमग्निर्वीरतमोवयोधाःसंहस्रि
योद्योततामप्रंयुछन् ॥ विभ्राजंमानःसरिरस्यमद्ध्यऽउपप्रयांहि
दिव्यानिधार्म ५२ सम्प्रच्यंवद्ध्वमुप ॥सम्प्रयातांग्नेपथोदेवयानान्कृ
णुद्ध्वम् ॥ पुनं÷कृण्वानापितरायुवांनान्वातांछंसीत्वयितन्तुमेतम्
५३ उद्बुंध्यस्व ॥ उद्बुंध्यस्वाग्नेप्रतिंजागृहित्वमिष्टापूर्तेसछंसृजे
थामयञ्च ॥ अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमा
नश्चसीदत ५४ येनवहसि ॥ सहस्रंयेनाग्नेसर्ववेदसम् ॥ तेनेमं



For Private and Personal Use Only

रुषङ्गन्नोनयस्वद्दैवेषुगन्तवे ५५ अयन्तैं ॥ अयन्तेयोनिर्ऋृत्वियोय
तोजातोऽअरोचथाः॥तज्ञानन्नग्नऽआरोहाथानोवर्द्धयारयिम॥५६
[८] तपश्च ॥ तपश्चतपस्यश्चशैशिरावृतूऽअग्नेरन्तःश्लेषोसि
कल्पैतान्द्यावापृथिवीकल्पन्तामापऽओषधय ः कल्पन्तामग्न
यः पृथङ्ममज्ज्यैष्ठ्यायसव्रताः ॥ येऽअग्नयःसमनसोन्तराद्यावापृ
थिवीऽइमे ॥ शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसं
विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ५७ परमेष्ठीत्त्वा ॥ सादय
तुदिवस्पृष्ठेज्ज्योतिष्मतीम् ॥ विश्वस्मैप्राणायापानायव्यानाय
विश्वञ्ज्योतिर्यच्छ ॥ सूर्यस्तेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द ५८ लोकम्पृण ॥ छिद्रम्पृणाथोसीदध्रुवात्वम् ॥ इन्द्राग्नीत्वाबृ
हस्पतिरुस्मिन्न्योनावसीषदन् ५९ ताऽअस्य ॥ सूददोहसःसोमँ
श्रीणन्तिपृश्न्नयः॥जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः६० इन्द्रंवि
श्श्वा॥इन्द्रंविश्श्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः॥रथीतमँरथीनां
वाजानाँसत्पतिम्पतिम्६१प्रोथदश्श्वं॥प्रोथदश्श्वोनयवसेविष्य
न्यदामहःसंवरणाद्व्यस्त्थात् ॥ आदस्यवातोऽअनुवातिशोचिरध
स्म्मतेव्रजनकृष्णमस्ति ॥ ६२ ॥ आयोष्ट्वा ॥ आयोष्ट्वासदनेसाद
याम्म्यवतश्छायायाँसमुद्रस्यहृदये ॥ रश्मीवतीम्भास्वतीमाया
द्याम्भास्यापृथिवीमोर्वन्तरिक्षम् ६३ परमेष्ठीत्वा ॥ सादयतुदिवस्पृ





For Private and Personal Use Only

ष्ट्रेयचंस्वर्तीम्प्रथंस्वतीन्दिवंरुयछ्छदिवंन्दृहुदिवुम्माहिंसीः ॥ वि
श्वंस्म्मैप्प्राणायांपानायंव्यानायोंदानायंप्प्रतिष्ठायैंचरित्रांय ॥ सू
र्य्यस्त्वाभिपांतुमह्यास्वुस्त्याछर्दिषाशन्तमेनतयांदेवतंयाङ्गिरस्व
द्ध्रुवेसींदतम् ६४ सुहस्रंस्यप्प्रमा॥सिंसुहस्रंस्यप्प्रतिमासिसुहस्रंस्यो
न्मासिंसाहस्रोसिसुहस्रांयत्त्वा ६५ [ ९ ] इतिसंहितापाठेपंचदशो
ध्यायः ॥ १५ ॥ नमस्तेषोडशहिरण्यबाहवऽउष्णीषिणेतक्षभ्योज्ये
ष्ठायपंचकाःस्तुत्यायचतस्त्रःशंभवायैकापार्श्वायपंचद्रापेअंधसोविं
शतिर्नवषट्षष्टिः ॥ नमस्ते ॥ नमंस्तेरुद्रमुन्यवंऽउतोतइषवेनमं: ॥
बाहुभ्यांमुततेनमंः १ यातें ॥ रुद्रशिवातनूरघोरापांपकाशिनी॥ त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि २ यामिषुम् ॥ या
मिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरित्रताङ्कुरुमाहिᳫसीःपु
रुषञ्जगत् ३ शिवेनवचसा ॥ त्वागिरिशाच्छावदामसि॥यथानःस
र्वमिज्जगदयक्ष्मᳫसुमनाऽअसत् ४ अद्ध्यवोचत् ॥ अद्ध्यवोचदधि
वक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधा
न्न्योधराचीःपरासुव ५ असौयः ॥ असौयस्ताम्म्रोऽअरुणऽउतब
भ्रुःसुमङ्गलः ॥ येचैनᳫरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाᳫहे
डऽईमहे ६ असौयः ॥ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥
उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ७ नमो





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तु ॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्युस
त्वानोहन्तेभ्योकरन्नमं ÷ ८ प्रमुञ्च ॥ प्रमुञ्चधन्न्वनुस्त्वमुभयोरा
त्न्यर्योर्ज्ज्याम् ॥ याश्चंतेहस्तऽइषवः परताभगवोवप ९ विज्ज्युन्ध
नुः ॥ कपर्दिनोविशल्ल्योबाणवाः ॥ उत ॥ अनेशन्नस्युयाऽइषवऽआ
भुरस्यनिषङ्गधिः १० यातें ॥ हेतिर्म्मीढुष्टमहस्तेबभूवंतेधनुः ॥ त
यास्म्मान्विश्श्वतुस्त्वमयुक्ष्म्मयापरिभुज ११ परिते ॥ परितेधन्न्वं
नोहेतिरस्म्मान्वृणक्तुविश्श्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्नि
धेहितम् १२ अवतत्यधनुः ॥ अवतत्यधनुष्ट्वᳬसहस्राक्षशतेषुधे ॥
निशीर्ष्यशल्ल्यानाम्मुखाशिवोनःसुमनाभव १३ नमस्ते ॥ नमस्तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽआयुंधायानांततायधृष्णवें ॥ उभाब्भ्यांमुततेनमोबाहुब्भ्यान्त
वधन्वने १४ मानं÷ ॥ मानोमहान्तंमुतमानोऽअर्भकम्मानुऽउक्षं
न्तमुतमानंऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानं÷ प्प्रिया
स्तन्वोरुद्द्ररीरिषः १५ मानंस्तोके ॥ तनंयेमानुऽआयुंषिमानोगोषु
मानोऽअश्श्वेषुरीरिषः ॥ मानोंवीरान्नुंद्द्रभामिनोवधींर्हविष्म्मंन्तः
सदमित्त्वांहवामहे १६ [ १६ ] शतम् ८०० नमोहिरंण्यबाहवे ॥
सेनान्येदिशाञ्चपतंयेनमोनमोवृक्षेब्भ्योहरिकेशेब्भ्यःपशूनाम्पतंये
नमोनमं÷ शष्प्पिञ्जंरायत्त्विषीमतेपथीनाम्पतंयेनमोनमोहरिकेशा
योपवीतिनेपुष्टानाम्पतंयेनमोनमोबब्भ्लुशायं१७नमोबब्भ्लुशायं॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्याधिनेन्नांनाम्पतंयेनमोनमोभुवस्यंहेत्त्यैजगंताम्पतंयेनमोनमो
रुद्रायांततायिनेक्षेत्रांणाम्पतंयेनमोनमं ÷ सूतायाहंन्त्यैवनांनाम्पतं
येनमोनमोरोहिंताय ॥ नमोरोहिंताय ॥ स्त्थुपतंयेव्वृक्षाणाम्पतंये
नमोनमोभुवन्तयेंव्वारिवस्कृतायौषधीनाम्पतंयेनमोनमोमुन्त्रिणेंव्वा
णिजायुकक्षांणाम्पतंयेनमोनमंऽउच्चैर्घोषायाक्रुन्दयंतेपत्तीनाम्प
तंयेनमोनमं÷कृत्स्नायुतयां १९ नम÷कृत्स्नायुतया ॥ धावंतेसत्त्वं
नाम्पतंयेनमोनमुःसहंमानायनिह्याधिनंऽआह्याधिनीनाम्पतंयेन
मोनमोनिषुङ्गिणेंककुभायंस्तेनानाम्पतंयेनमोनमोनिचेरवेंपरिच
रायारंण्यानाम्पतंयेनमोनमोव्वश्वंते २० नमोव्वश्वंते ॥ परिवश्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेन
मोनमः सृकायिभ्योजिघांᳲसद्भ्योमुष्णताम्पतयेनमोनमोसिम
द्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः २१ [ ५ ] नमऽउष्णीषि
णे ॥ गिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्य
श्चवोनमोनमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्चवोनमोनम
ऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः २२ नमोविसृज
द्भ्योविध्यद्भ्यश्चवोनमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमऽश
यानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो
नमः सभाभ्यः २३ नमः सभाभ्यः ॥ सभापतिभ्यश्चवोनमोन



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोऽश्वेभ्योऽश्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविवि
ध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृंहतीभ्यश्चवोनमोनमो
गणेभ्यः२४नमोगणेभ्यो॥गणपतिभ्यश्चवोनमोनमोव्रातेभ्यो
व्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोन
मोविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः २५ नमः
सेनाभ्यः ॥ सेनानिभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्यश्च
वोनमोनमःक्षतृभ्यःसङ्ग्रहीतृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भके
भ्यश्चवोनमः २६ [ ५ ] नमस्तक्षभ्यः ॥ नमस्तक्षभ्योरथका
रेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्यश्चवोनमोनमोनिषा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देभ्यं ॑पु॒ञ्जि॒ष्टेभ्य॑श्च॒वो॒नमो॒नमं॑ ॑श्व॒नि॒भ्यो॒मृ॒ग॒यु॒भ्य॑श्च॒वो॒न
मो॒नमुः॑श्व॒भ्यं॑ २७ नमुः॑श्व॒भ्यः॑श्व॒प॑तिभ्य॑श्च॒वो॒नमो॒नमो॑भ॒
वाय॑च॒रु॒द्राय॑च॒नमः॑ शर्वाय॑च॒प॒शु॒पत॑येच॒नमो॒नील॑ग्रीवाय॒च॒शि॒ति॒क
ण्ठाय॑च॒नमः॑ कप॒र्दिने॑ २८ नमः॑ कप॒र्दिने॑ ॥ च॒व्यु॑प्तकेशाय॒च॒नमः॑
सहस्रा॒क्षाय॑च॒शत॑धन्वनेच॒नमो॑गि॒रि॒श॒याय॑च॒शि॒पि॒वि॒ष्टाय॑च॒नमो॑
मी॒ढुष्ट॑माय॒चेषु॑मतेच॒नमो॑ह्र॒स्वाय॑ २९ नमो॑ह्र॒स्वाय॑ ॥ च॒वा॒मु॒ना
य॑च॒नमो॑बृह॒तेच॒वर्षी॑यसेच॒नमो॑वृ॒द्धाय॑च॒स॒वृधे॑च॒नमो॑ग्र्याय॑च॒प्र॒थु
माय॑च॒नमः॑ऽआ॒शवे॑ ३० नमः॑ऽआ॒शवे॑ ॥ चा॒जि॒राय॑च॒नमः॑ शीघ्र्या॑
य॑च॒शी॒भ्याय॑च॒नमः॑ऽऊर्म्या॑यचावस्व॒न्याय॑च॒नमो॑ना॒द्याय॑च॒द्वि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्प्यायच ३१ [५] नमोज्ज्येष्ठायं ॥ चकनिष्ठायंचुनमः पूर्व्वजायं
चापरजायंचुनमोमद्ध्यमायंचापगल्भायंचुनमोजघन्यायचबु
ध्न्यायचुनमःसोभ्याय ३२ नमःसोभ्याय ॥ चप्रतिसर्याय
चुनमोयाम्म्यायचक्षेम्म्यायचुनमःश्लोक्यायचावसान्यायचुन
मऽउर्व्वर्यायचुखल्यायचुनमोवन्याय ३३ नमोवन्याय ॥ चुक
क्ष्यायचुनमःश्रवायंचप्रतिश्रवायंचुनमऽआशुषेणायचाशुरथा
यचनमःशूरायचावभेदिनेंचुनमोबिल्म्मिनें ३४ नमोबिल्म्मिनेंच
कवचिनेंचुनमोवर्म्मिणेंचवरूथिनेंचुनमः श्रुतायंचश्रुतसेनायं
चुनमोदुन्दुभ्यायचाहनन्यायचुनमोधृष्णवे ३५ नमोधृष्णवे ॥

For Private and Personal Use Only

संहि. चप्प्रमृशायंचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिने पू.अ
१०५ चनमःस्वायुधायचसुधन्वनेच ३६ [५] नमःस्रुत्याय ॥ चप १६
थ्यायचनमःकाट्यायचनीप्प्यायचनमः कुल्यायचसरस्यायच
नमोनादेयायचवैशन्तायचनमःकूप्प्याय ३७ नमःकूप्प्याय ॥
चावट्यायचनमोवीध्र्यायचातप्प्यायचनमोमेघ्यायचविद्युत्या
यचनमोवर्ष्यायचावर्ष्यायचनमोवात्याय ३८ नमोवात्याय ॥
चरेष्म्यायचनमोवास्तव्यायचवास्तुपायचनमः सोमायचरुद्राय
चनमस्ताम्रायचारुणायचनमःशङ्गवे ३९ नमःशङ्गवे ॥ चपशुप १०८
तयेचनमः उग्रायचभीमायचनमोअग्रेवधायचदूरेवधायचनमोह

न्वेहचुनींयसेञ्चनमोंवृक्षेभ्योहरिंकेशेभ्योनमस्तारायं ४० [४] न
मं÷शम्भुवायं ॥ चमयोभुवायंचुनमं÷शङ्करायंचमयस्करायंचुनमं÷
शिवायंचशिवतंरायच ४१ [ १ ] नमुऽपार्य्यांय ॥ चावार्य्यांयचु
नमं ÷ प्प्रतंरणायचोत्तंरणायचुनमुस्तीर्त्थ्यांयचकूल्यांयचुनमुऽ श
ष्प्यांयचुफेन्यांयचुनमं÷सिकुत्त्यायं४२नमं÷सिकुत्याय ॥ चप्प्र
वाह्यायचुनमं÷किंशिलायंचक्षयणायंचुनमं ÷कुपर्द्दिनेचपुलस्त
ङ्कर्णौतेदनीमधरकण्ठेनापःशुष्ककण्ठेनचित्तम्मन्याभिरदितिꣳशी
र्ष्णानिर्ऋतिन्निर्जर्जल्पेनशीर्ष्णासङ्क्रोशैःप्राणान्रेष्माणꣳस्तुपे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. नं २[१]मशकान्केशैः ॥ मशकान्केशैरिन्द्रꣳस्वपसावहेनबृहस्पतिं उ.अ.
२८ ꣳशकुनिसादेनकूर्म्माञ्छफैराक्रमणꣳस्थूराभ्यांमृक्षलाभिःकपि २५
ञ्जलाञ्जवञ्जङ्घाभ्यामध्वानम्बाहुभ्याञ्जाम्बीलेनारण्यमग्निमतिरु
ग्भ्याम्पूषणन्दोर्भ्यामश्विनावꣳसाभ्याꣳरुद्रꣳरोराभ्याम्
३[१]अग्नेःपक्षतिः ॥ अग्नेःपक्षतिर्वायोर्न्निपक्षतिरिन्द्रस्यतृतीयासो
मस्यचतुर्त्थ्यदित्यैपञ्चमीन्द्राण्यैषष्ठीमरुताꣳसप्तमीबृहस्पतेरष्ट
म्म्यर्य्यम्णोनवमीधातुर्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशीयमस्य
त्रयोदशी ४[१] इन्द्राग्न्योःपक्षतिःसरस्वत्यैनिपक्षतिर्म्मित्रस्यतृ २८
तीयापाञ्चतुर्त्थीनिर्ऋत्यैपञ्चम्यग्नीषोमयोःषष्ठीसर्प्पाणाꣳसप्तमी

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विष्ष्णोरष्टमीपूष्ष्णोनवमीत्वष्टुर्द्दशमीन्द्रस्यैकादशीवरुणस्यद्वादशी
यम्म्यैत्रयोदशीद्यावापृथिव्योर्द्दक्षिणम्पार्श्वंविश्वेषान्देवानामुत्त
रम्५[१]मरुताᳬस्कन्धाः॥मरुताᳬस्कन्धाविश्वेषान्देवानाम्प्रथ
माकीकसारुद्राणान्द्वितीयादित्यानान्तृतीयावायोः पुच्छमग्नीषोम
योर्भासदौक्रुञ्चौश्श्रोणिभ्यामिन्द्राबृहस्पतीऽऊरुभ्याम्मित्राव
रुणावल्गाभ्यामाक्रमणᳬस्थूराभ्याम्बलङ्कुष्ठाभ्याम् ६[१] पू
षणंवनिष्ठुनान्धाहीन्स्थूलगुदयासर्प्पान्गुदाभिर्विह्रुतऽआन्त्रैरपोव
स्तिनावृषणमाण्डाभ्यांवाजिनᳬशेपेनप्रजाᳬरेतसाचाषान्पित्ते
नप्प्रदरान्पायुनाकूश्मान्छकपिण्डैः७[१] इन्द्रस्यक्रोडः॥इन्द्रस्य

क्रोडोदित्यैपाजस्यन्दिशाञ्जत्रवोदित्यैभसज्जीमूतान्हृदयौपशेनान्त
रिक्षम्पुरीततानभंऽउदर्य्यैणचक्रवाकौमतंस्नाभ्यान्दिवंवृक्काभ्यां
ङ्गिरीन्प्लाशिभिरुपलान्प्लीह्नावल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मा
न्हिराभिःस्रवन्तीर्ह्रदान्कुक्षिभ्यांसमुद्रमुदरेणवैश्वानरम्भस्म
ना ८ [ १ ] विधृतिन्नाभ्यां॥ घृतंरसेनापोयूष्णामरीचीर्विप्रुड्भि
र्नीहारमूष्मणाशीनंवसयाप्रुष्वाऽअश्रुभिर्ह्रादुनीर्दूषीकाभिर
स्नारक्षांसिचित्राण्यङ्गैर्नक्षत्राणिरूपेणपृथिवीन्त्वचाजुम्बकाय
स्वाहा९[१]हिरण्यगर्भःसम॥ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजा २९
तःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहवि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षांविधेम १० यःप्प्राणतः ॥ यःप्प्राणतोनिंमिषतोमंहित्वैकइद्रा
जाजगंतोबभूव ॥ यईशेंअस्यद्विपदश्चतुष्पदःकस्मैदेवायंह
विषांविधेम ११ यस्येमे ॥ हिमवंन्तोमहित्वायस्यंसमुद्रंरसयांस
हाहुः ॥ यस्येमाःप्प्रदिशोयस्यंबाहूकस्मैदेवायंहविषांविधेम १२
यआंत्मदाः ॥ यआत्मदांवंलदायस्यविश्वंउपासंतेप्प्राशिषं
यस्यंदेवाः ॥ यस्यंछायामृतंयस्यंमृत्युःकस्मैदेवायंहविषांवि
धेम१३[४]आनंः॥आनोंभद्राःक्रतंवोयन्तुविश्वतोदंब्धासोअप
रीतासउद्भिदंः॥देवानोयथासदमिद्वृधेअसन्नप्प्रांयुवोरक्षितारोंदि
वेदिवे १४ देवानांम्भद्रा॥सुमतिंर्ऋजूयतान्देवानां रातिरभिनो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्वर्त्तताम् ॥ देवानांᳪसख्यमुपसेदिमाव्वयन्देवानऽआयुःप्रतिर
न्तुजीवसे १५ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमु
स्रिधम् ॥ अर्य्यमणंव्वरुणᳪसोममश्श्विनासरस्वतीनःसुभगामय
स्करत् १६ तन्नः ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीत
त्पिताद्द्यौः ॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्श्विनाशृणुतान्धि
ष्ण्यायुवम् १७ तमीशानम् ॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धि
यञ्जिन्न्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुर
दब्धःस्वस्तये १८ स्वस्तिनः ॥ स्वस्तिनऽइन्द्रोवृद्धश्श्रवाःस्वस्ति ३०
नःपूषाविश्श्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृह

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्पतिर्दधातु १९ पृषदश्वामरुतः ॥ पृषदश्वामरुतःपृश्निमात
रःशुभंयावानोविदथेषुजग्मयः ॥ अग्निजिह्वामनवःसूरचक्षसो
विश्वेनोदेवाऽअवसागमन्निह २० भद्रङ्कर्णेभिःशृणुयामदेवाभद्र
म्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवा ६ संस्तनूभिर्व्यशेमहिदे
वहितंयदायुः २१ शतमित् ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रान
श्चक्राजरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारी
रिषतायुर्गन्तोः २२ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपि
तासपुत्रः॥विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनि
त्वम् २३[१०]मानः॥मानोमित्रोवरुणोऽअर्यमायुरिन्द्रऽऋभुक्षाम

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुतंऽपरिंक्ख्यन्॥ यद्वाजिनोदेवजांतस्यसप्तेंःप्प्रवक्ष्यामोविदथेंवी
र्य्याणि २४ यन्निर्णिजां ॥ यन्निर्णिजारेक्णंसाप्प्रावृतंतस्यरातिङ्गृं
भींताम्मुखतोनयंन्ति ॥ सुप्प्राङ्जोमेम्म्यंद्विश्श्वरूपऽइन्द्रापूष्णोः
प्प्रियमप्प्येंतिपाथंः २५ एषच्छागंः॥पुरोऽअश्श्वेंनवाजिनांपूष्णो
भागोनींयतेव्विश्श्वदेंव्यंः ॥ अभिप्प्रियंय्यत्पुरोडाशमर्व्वतात्वष्टेदेंनं
सौश्श्रवसायंजिन्वति २६ यद्धविष्ष्यम् ॥ यद्धविष्ष्यमृतुशोदेंव
यानन्त्रिम्मानुंषाःपर्य्यश्श्वन्नयंन्ति ॥ अत्रांपूष्णःप्प्रथमोभाग
ऽएंतियज्ञन्देवेब्भ्यंः प्प्रतिवेदयंन्नुजः २७ होतांद्ध्वर्य्युः ॥ होतांद्ध्व
र्य्युरावंयाऽअग्निमिन्धोग्ग्रांवग्ग्राभऽउतशंᳪस्तासुविंप्प्रः ॥ तेनंय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञेनस्वरकृतेनस्विष्टेनवक्षणाऽआपृणध्वम्२८ यूपव्रस्काऽउत ॥ येयू
पवाहाश्चषालंयेऽअश्वयूपायतक्षति ॥ येचार्वतेपचनंसम्भर
न्त्युतोतेषामभिगूर्तिर्नऽइन्वतु २९ उपप्र ॥ उपप्रागात्सुमन्मेधा
यिमन्मदेवानामाशाऽउपवीतपृष्ठः ॥ अन्वेनंविप्राऽऋषयोमदन्ति
देवानांपुष्टेचकृमासुबन्धुम् ३० यद्वाजिनः ॥ यद्वाजिनोदामसं
न्दानमर्वतोयाशीर्षण्यारशनारज्जुरस्य ॥ यद्वाघास्यप्रभृतमास्येतृ
णंसर्वाताते ऽअपिदेवेष्वस्तु३१[८] यदश्वस्यक्रविषोम॥क्षिका
शयद्वास्वरौस्वधितौरिप्तमस्ति ॥ यद्धस्तयोःशमितुर्यन्नखेषुसर्वा
ताते ऽअपिदेवेष्वस्तु ३२ यदूवध्यम् ॥ यदूवध्यमुदरस्यापवातिय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽआमस्यंक्रविषोंगन्धोऽअस्तिं ॥ सुकृतातच्छंमितारंःकृण्वन्तूतमे
धंᳪशृतपाकंम्पचन्तु ३३ यत्तें ॥ यन्तेगात्रांदग्निनांपच्यमांनादभि
शूलन्निहंतस्यावधावंति ॥ मातद्भूम्म्यामाश्रिषन्मातृणेषुदेवेभ्य
स्तदुशद्भ्योरातमंस्तु ३४ येवाजिनम् ॥ येवाजिनम्परिपश्यंन्तिपक्वं
यऽईमाहुःसुरभिर्न्निर्हरेति ॥ येचार्वतोमाᳪसभिक्षामुपासंतऽउतो
तेषांमभिगूर्त्तिर्न्नऽइन्वतु ३५ यन्नीक्षंणम् ॥ यन्नीक्षंणम्माँस्पच
न्याऽउखायायापात्रांणियूष्णऽआसेचंनानि ॥ ऊष्मण्यापिधा
नांचरूणामङ्काःसूनाःपरिभूषन्त्यश्वम् ३६ मात्वां ॥ मात्वाग्निर्द्ध
नयीद्धूमगंन्धिर्म्माखाभ्राजन्त्यभिविंक्तजग्घ्रिः ॥ इष्टंवीतमभि



For Private and Personal Use Only

गूर्तुंघषेट्टतुन्तन्देवासुंऽप्रतिंगृ॒भ्णुन्त्यश्श्वंम् ३७ निक्रमंणान्निषदं
नम् ॥ निक्रमंणन्निषदंनांव्विवर्तनुंयञ्चुपड्वींशमर्वतः ॥ यच्चंपुपौयच्चं
घासिजुघासुसर्व्वातते्ऽअपिंदेवेष्ष्वस्तु ३८ यदश्श्वाय ॥ यदश्श्वां
युवासंऽउपस्तृणन्त्यंधीवासंय्याहिरंण्यान्यस्म्मै ॥ सुन्दानुमर्वन्त
म्पड्वींशम्प्रियादेवेष्ष्वायांमयान्ति ३९[८]यत्तें॥सादेमहेसाशूकृंतस्य
पाष्ष्णर्यावाकशंयावातुतोदं ॥ स्रुचेवुताहविषोंऽअहूरेषुसर्व्वाताते्ब्र
ह्मंणासूदयामि ४० चतुंस्त्रिᳫंशह्वाजिनः ॥ चतुंस्त्रिᳫंशह्वाजिनोंदेव
बंन्धोर्व्वङ्क्रीरश्श्वंस्यस्वाधिंतिःसमेंति ॥ अच्छिद्राागात्राांव्वयुनांकृणो
तुपरुंष्ष्परुरनुघुष्ष्या्विशंस्त ४१ एकुस्त्वष्टुंः ॥ एकुस्त्वष्टुरश्श्वं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. स्याविशस्ताह्वासन्तारांभवतस्तथऽऋतु ॥ यातेगात्राणामृतुथाकृ उ.अ.
३३ णोमितातापिण्डानाम्प्रजुहोम्म्यग्नौ ४२ मात्वांतयत्प्रियऽआत्मा २५
पियन्तम्मास्वधितिस्तन्वऽआतिष्ठिपत्ते ॥ मातेगृध्नुरविशस्तातिहा
यच्छिद्रागात्राण्यसिनामिथूकः ४३ नवै ॥ नवाऽउऽएतन्म्रियसेनरि
ष्यसिदेवाः ॥ इदेषिपथिभिःसुगेभिः ॥ हरीतेयुञ्जापृषतीऽअभूता
मुपास्थाद्वाजीधुरिरासभस्य ४४ सुगव्यन्नः ॥ सुगव्यन्नोवाजीस्व
श्व्यम्पुंसःपुत्राः ॥ उतविश्वापुषंरयिम् ॥ अनागास्त्वन्नोऽअ
दितिःकृणोतुक्षत्रन्नोऽअश्वोवनताहविष्मान४५[६]इमानु॥कु ३३
म्भुवनासीषधामेन्द्रश्चविश्वेचदेवाः ॥ आदित्यैरिन्द्रःसगणोमरु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्भिरुस्म्मभ्यम्भेषुजाकरत्॥सुन्न श्चेनस्तन्त्व श्चप्पुजाश्चादित्यैरिन्द्रंः
सुहसीषधाति ४६ अग्नेत्वन्नोऽअन्तं ॥ मऽउतत्राताशिवोभवावरु
थ्य्यः ॥ वसुरग्निर्वसुश्श्रवाऽअच्छानक्षिद्युमत्तमᳬरयिन्दाः ॥तन्त्वा
शोचिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः४७[२] इतिसंहितायां
पंचविंशोऽध्यायः २५ [१५] अग्निश्चपंचदशोध्यातएकादशद्वौषड्वि
ंशतिः॥ अग्निश्च ॥ पृथिवीचसन्नंतेतेमेसन्नमतामुदोवायुश्चान्त
रिक्षञ्चसन्नंतेतेमेसन्नंमतामदऽआदित्यश्चद्यौश्चसन्नंतेतेमेसन्नमता
मदऽआपश्चवरुणश्चसन्नंतेतेमेसन्नमतामदः॥सप्तसᳬसदोऽअष्टमी
भूतसाधनी ॥ सकामाः॥ऽअद्ध्वनस्कुरुसनमस्तुमेमुना १ यथेमाम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षथेमांवाचङ्कल्याणीमावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्या᳕ं
३४ शूद्रायुचार्य्यायचुस्वायुचारणायच ॥ प्प्रियोदेवानान्दक्षिणायैदा २६
तुरिहभूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु २ बृहस्प्पतेऽअ
ति ॥ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु ॥ ष
दीदयुच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्त्रम् ॥ उपयाम
गृहीतोसिबृहस्प्पतयेत्वैषतेयोनिर्बृहस्प्पतयेत्वा ३ इन्द्रगोमन् ॥ इ
न्द्रगोमन्निहायाहिपिबासोम᳖ंशतक्क्रतो । विद्याद्भिर्ग्ग्रावभिः सुतम् ॥
उपयामगृहीतोसीन्द्रायत्वागोमतऽएषतेयोनिरिन्द्रायत्त्वागोमते ४इ ३४
न्द्रायाहि ॥ इन्द्रायाहिवृत्त्रहन्पिबासोम᳖ंशतक्क्रतो ॥ गोमद्भिर्ग्ग्राव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिꣳसुतम् ॥ उपयामगृंहीतोसीन्द्रांयत्वागोमंतऽएषतेयोनिरिन्द्रांय
त्वागोमंते ५ ऋतावांनंवैश्श्वानरम् ॥ ऋतावांनंवैश्श्वानरमृतस्य
ज्ज्योतिषस्पतिम्॥अजंस्रङ्घर्म्ममीमहे ॥ उपयामगृंहीतोसिवैश्श्वा
नरायंत्वैषतेयोनिर्वैश्श्वानरायंत्वा ६ वैश्श्वानरस्यंसुमतौ ॥ स्यां
मराजाहिकम्भुवंनानामभिश्श्री ॥ इतोजातोविश्श्वंमिदंविचंष्टेवै
श्श्वानरोयंततेसूर्य्येण ॥ उपयामगृंहीतोसिवैश्श्वानरायंत्वैषतेयो
निर्वैश्श्वानरायंत्वा ७ वैश्श्वानरोनं÷ ॥ वैश्श्वानरोनंऽऊतयऽआ
प्प्रयांतुपरावतं÷ ॥ अग्निरुक्थेनवाहंसा॥उपयामगृंहीतोसिवैश्श्वा
नरायंत्वैषतेयोनिर्वैश्श्वानरायंत्वा ८ अग्निर्ऋषिं÷ ॥ अग्निर्ऋषि॥ꣳ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवंमानऽपाञ्चंजन्न्यऽपुरोहितंः ॥ तमींमहेमहागयम् ॥ उपयामगृं
हीतोस्युग्ग्नयेत्वाब्बर्च्चसऽएषतेयोनिरुग्ग्नयेत्वाब्बर्च्चसे ९ मुहाँ ॥ ऽइ
न्द्रंः ॥ मुहाँ२ ॥ ऽइन्द्रोब्वज्रंहस्तंऽषोडुशीशर्म्मयच्छतु ॥हन्तुंपाप्प्मा
नंठ्योस्म्मान्द्वेष्टि ॥ उपयामगंहीतोसिमहेन्द्रायंत्वैषतेयोनिर्म्महेन्द्रा
यंत्वा १० तंब्वंः ॥ तंब्वोदस्म्ममृतीषहंब्वसोर्म्मदानमन्धसंः ॥ अभि
वत्सन्नस्वसंरेषुधेनवऽइन्द्रंङ्गीर्भिर्न्नवामहे ११ यद्वाहिष्ठम् ॥ यद्वा
हिष्ठन्तदग्ग्नयेबृहदर्च्चंब्विभावसो ॥ महिंषीवत्वद्रयिस्त्वद्वाजाऽउदीरते
१२ एहिं ॥ एह्यूषुब्रवांणितेग्ग्नऽइत्थेतंरागिरंः ॥ एभिर्वर्द्धासऽइन्दुं
भिंः १३ ऋतवंस्ते ॥ ऋतवंस्तेयज्ञंव्वितंन्वन्तुमासारक्षन्तुंतेहविंः ॥



For Private and Personal Use Only

सुंवत्सुरस्तेंयुज्ञन्दंधातुनःप्पुजाश्चुपारिंपातुनः १४ उपुह्वरेगिरीुणा
म् ॥ उपुह्वरेगिंरीुणाध्ंसंङ्गुमेचंनुदीनांम्॥ धियाविप्प्रोंऽअजायत
१५ [१५ ] उच्चातें ॥ उच्चातेंजुातमन्धंसोदिविसद्भूम्म्यादंदे ॥ उ
ग्ग्रध्शर्म्मुमहिश्श्रवंः १६ सनंः ॥ सनुऽइन्द्रांयुयज्ज्यंवेंवरुंणायम
रुद्भ्यः ॥ वरिवोवित्पारिंस्रव १७ एनाविश्श्वानि ॥ एनाविश्श्वां
न्युर्य्यऽआद्युम्म्नानिमानुंषाणाम् ॥ सिषांसन्तोवनामहे १८ अनुं
वीरैः ॥ अनुंवीरैरनुंपुष्ष्यास्म्मुगोभिरन्वश्श्वेरनुसर्व्वेणपुष्टैः ॥ अ
नुद्विपुदानुचतुंष्पदावयन्देवानोंयुज्ञमृंतुथानंयन्तु १९ अग्नेपत्क्रीः
॥ अग्नेपत्क्रींरिहावंहदेवानांमुशतीरुप ॥ त्वष्टांरुध्सोमंपीतये २०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सांहि. अभियज्ञम् ॥ अभियज्ञङ्गृणीहिनोग्ग्नावोनेष्टःपिबऽऋतुना ॥ त्वᳪ उ.अ.
३६ हिरत्नधाऽअसि २१ द्रविणोदाःपिपीषति । जुहोतप्रचतिष्ठत॥ने २६
ष्ट्रादृतुभिरिष्यत २२ तवायम् ॥ तवायᳪसोमस्त्वमेह्यर्वाङ्श्श्वत्त
मᳪसुमनाऽअस्यपाहि ॥ अस्मिन्यज्ञेबर्हिष्ष्यानिषद्यादधिष्वेम
ञ्जठरऽइन्दुमिन्द्र २३ अमेवंनः ॥ अमेवंनःसुहवाऽआहिगन्तंन
निबर्हिषिसदतनारणिष्ठन ॥ अथामन्दस्वजुजुषाणोऽअन्धसस्त्वष्ट
र्देवेभिर्ज्जनिभिःसुमद्गणः २४ स्वादिष्ठयामदिष्ठया ॥ स्वादिष्ठयाम
दिष्ठयापवस्वसोमधारया ॥ इन्द्रायपातवेसुतः २५ रक्षोहाविश्श्व ३६
चर्षणिरभियोनिमयोहते ॥ द्रोणसधस्थमासदत् २६ [११]॥२॥इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहितायांषाड्विंशतिमोऽध्यायः २६ समास्त्वादशोर्न्हाअस्यपीवोअ
न्वाद्वादशकावभित्वेकादशचत्वारःपंचचत्वारिंशत् ॥ समांस्त्वा ॥
समांस्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयोयानिसत्या ॥ सन्दि
व्येनदीदिहिरोचनेनविश्वाऽआभाहिप्प्रदिशश्चतस्रः १ सञ्चेद्ध्य
स्वाग्नेप्प्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय ॥ माचरिषदुपसत्तातेऽ
अग्नेब्रह्माणस्तेयशसः सन्तुमान्ये २ त्वामग्ने ॥ त्वामग्नेवृणते
ब्राह्मणाऽइमेशिवोऽअग्नेसंवरणेभवानः ॥ सपत्नहानोऽअभिमा
तिजिच्चस्वेगयेजागृह्यप्प्रयुच्छन् ३ इहैव ॥ इहैवाग्नेऽअधिधार
यारयिम्मात्वानिक्रन्पूर्वचितोनिकारिणः ॥ क्षत्रमग्नेसुयमस्तु

For Private and Personal Use Only

न्यंमुपसत्तावर्द्धतान्तेऽअनिष्टृतः ४ क्षत्रेणाग्ने ॥ क्षत्रेणाग्नेस्वायुः
सꣳरभस्वमित्रेणाग्नेमित्रधेयेयतस्व ॥ सजातानांम्मद्ध्यमस्थाऽए
धिराज्ञामग्नेविहव्योदीदिहीह ५ अतिनिहः ॥ अतिनिहोऽअति
स्रिधोत्याचित्तिमत्यरातिमग्ने ॥ विश्श्वाह्यग्नेदुरितासहस्वाथास्म्म
भ्यꣳसहवीराꣳरयिन्दाः ६ अनाधृष्योजातवेदाः ॥ अनाधृ
ष्योजातवेदाऽअनिष्टृतोविराडग्नेक्षत्रभृद्दीदिहीह ॥ विश्श्वाऽआशाः
प्प्रमुञ्चन्मानुषीर्भियःशिवेभिरद्यपरिपाहिनोवृधे ७ बृहस्पतेस
वितः ॥ बृहस्पतेसवितर्बोधयैनꣳसꣳशितञ्चित्सन्तराꣳसꣳशिशा
धि ॥ वर्द्धयैनम्महतेसौभगायविश्श्वेऽएनमनुमदन्तुदेवाः ८ अमु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रभूयादघं ॥ अमुत्रभूयादघयद्यमस्यबृहंस्पतेऽअभिशंस्तेरमुंञ्चः॥
प्रत्यौहतामश्श्विनांमृत्युमंस्म्माद्देवानांमग्नेभिषजाशचींभिः ९ उद्व
यम् ॥ उद्वयन्तमंसस्प्पारिस्वःपश्यंन्तऽउत्तंरम् ॥ देवन्देवत्रासूर्य्यम
गंन्मज्ज्योतिरुत्तमम् १० [ १० ] ऊर्द्ध्वाऽअंस्यसमिधोंभवन्त्यूर्द्ध्वा
शुक्राशोचींष्यग्नेः ॥ द्युमत्तंमासुप्प्रंतीकस्यसूनोः ११ तनूनपाद
सुंरः ॥ तनूनपादसुंरोविश्श्ववेंदादेवोदेवेषुदेवः ॥ पथोऽअंनक्तुमद्ध्वां
घृतेनं १२ मद्ध्वांयज्ञम्॥ मद्ध्वांयज्ञन्नंक्षसेप्प्रीणानोनराशःसोऽअग्ने॥
सुकृद्देवःसंविताविश्श्ववांरः १३ अच्छायम् ॥ अच्छायमेंति । श
वंसाघृतेनेंडानोवन्हिर्न्नमंसा ॥ अग्निःस्रुचोंऽअद्ध्वरेषुंप्प्रयत्सुं १४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सयंक्षत् ॥ सयंक्षदस्यमहिमानमग्नेःसऽईम्मन्द्रासुप्प्रयसः ॥ वसु
 श्चेतिष्ठोवसुधातमश्च १५ द्वारोदेवीः ॥ द्वारोदेवीरन्वस्यविश्श्वेव्र 
तादन्तेऽअग्नेः ॥ उरुव्यचसोधाम्नापत्यमानाः १६ तेऽअस्य ॥
तेऽअस्ययोषणेदिव्येनयोनाऽउषासानक्ता ॥ इमंयज्ञमवतामध्वर
न्नः १७ दैव्याहोतारा ॥ ऽऊर्ध्वमध्वरन्नोग्नेर्जिह्वामभिगृणीतम् ॥ कृ
णुतन्नःस्विष्टिम् १८ तिस्रोदेवीः ॥ तिस्रोदेवीर्बर्हिरेदꣳसदन्त्विडास
रस्वतीभारती ॥ महीगृणाना १९ तन्नः ॥ तन्नस्तुरीपमद्भुतम्पुरुक्षु
त्वष्टासुवीर्यम् ॥ रायस्प्पोषंविष्ष्यतुनाभिमस्म्मे २० वनस्प्प
तेवसृजाररराणस्त्मनादेवेषु ॥ अग्निर्हव्यꣳशमितासूदयाति २१ अ 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्नेस्वाहा ॥ कृणुहिजातवेदऽइन्द्रायहव्यम् ॥ विश्वेदेवाहविरिद
ञ्जुषन्ताम् २२ [ १२ ] पीवोऽअन्नारयिवृधं ÷ ॥ सुमेधाःश्वेतः
सिषक्तिनियुतामभिश्रीः ॥ तेवायवेसमनसोवितस्थुर्विश्वेन्नरं ÷
स्वपत्यानिचक्रुः २३ रायेनु ॥ यञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधा
तिदेवम् ॥ अधवायुन्नियुतंसश्चतस्वाऽउतश्वेतंवसुधितिन्निरेके
२४ आपोह॥आपोहयद्बृहतीर्विश्वमायन्गर्भन्दधानाजनयन्तीर
ग्निम्॥ततोदेवानाथ्ंसमवर्त्ततासुरेकःकस्मैदेवायहविषाविधेम२५
यश्चित ॥ यश्चिदापोमहिनापर्य्यपश्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञ
म् ॥ योदेवेष्वधिदेवऽएकऽआसीत्कस्मैदेवायहविषाविधेम २६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयाभिः÷ ॥ प्रयाभिर्यासिदाश्वाꣳसमच्छानियुद्भिर्वायविष्टयेदु
३९ रोणे ॥निनोरयिꣳसुभोजसंꣳयुवस्वनिवीरङ्गव्यमश्व्यंꣳराधः÷२७ २७
आनः÷ ॥ आनोनियुद्भिः÷शतिनीभिरध्वरꣳसंहस्रिणीभिरुपयाहियज्ञ
म्॥वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः २८
नियुत्वान्वायो ॥ नियुत्वान्वायवागह्ययꣳशुक्रोऽअयामिते ॥ग
न्तासिसुन्वतोगृहम् २९ वायोशुक्रः ॥ वायोशुक्रोऽअयामितेम
ध्वोऽअग्रन्दिविष्टिषु ॥ आयाहिसोमपीतयेस्पार्होदेवनियुत्वता ३०
वायुरग्रेगाः॥वायुरग्रेगायज्ञप्रीःसाकङ्गन्मनसायज्ञम् ॥ शिवो २९
नियुद्भिः÷शिवाभिः÷ ३१ वायोये ॥ तेसहस्रिणोरथासस्तेभिरागहि॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियुत्वान्त्सोमपीतये ३२ एकयाच ॥ दशभिश्चस्वभूतेद्वाभ्यामि
ष्टयेविंशतीचं ॥ तिसृभिश्चवहसत्रिंशतांचनियुद्भिर्वायविहता
विमुंच ३३ तववायो ॥ तववायवृतस्पतेत्वष्टुर्जामातरद्भुत ॥ अ
वांस्यावृणीमहे ३४ [ १२ ] अभित्वा ॥ शूरनोनुमोदुग्धाइव
धेनवः ॥ ईशानमस्यजगतःस्वर्दृशमीशानमिन्द्रतस्थुषः ३५ न
त्वावान् ॥ नत्वावाँ २ ॥ अन्योदिव्योनपार्थिवोनजातोनजनि
ष्यते ॥ अश्वायन्तोमघवन्निंद्रवाजिनोगव्यन्तंस्त्वाहवामहे ३६
त्वामित् ॥ त्वामिद्धिहवामहेसातौवाजस्यकारवः ॥ त्वांवृत्रेष्विन्द्र
सत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ३७ सत्वम् ॥ सत्वन्नश्चित्रवज्रहस्त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धृष्णुयामुहस्तंवानोऽअद्रिवः ॥ गामश्वंरत्थ्यमिन्द्रसङ्किरसत्रा 
वाजन्नजिग्युषे ३८ कयानः ॥ कयानश्चित्रऽआभुवदूतीसदावृ
धःसखा ॥ कयाशचिंष्ठयावृता ३९ कस्त्वा ॥ सत्योमदानाम्मर्ठहि
ष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेवसु ४० अभीषुणः ॥ अभीषुणः
सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूतये ४१ यज्ञायज्ञावः ॥
यज्ञायज्ञावोऽअग्नयेगिरागिराचदक्षसे॥प्रप्रवयममृतञ्जातवेदसम्प्रि
यम्मित्रन्नशर्ठसिषम् ४२ पाहिनः ॥ पाहिनोऽअग्नऽएकयापाह्युत
द्वितीयया॥पाहिगीर्भिस्तिसृभिरूर्जाम्पतेपाहिचतसृभिर्वसो४३ 
ऊर्जोनपातम् ॥ ऊर्जोनपातर्ठसहिनायमस्मयुर्दाशेमहव्यदातये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भुवद्वाजेष्ष्वविताभुवंद्रुधऽउतत्रातातनूनाम् ४४ संवत्सरोसि ॥ प
रिवत्सरोसीदावत्सरोसीद्वत्सरोसि ॥ उषसंस्तेकल्पन्तामहोरात्रा
स्तेकल्पन्तामर्द्धमासास्तेकल्पन्ताम्मासास्तेकल्पतामृतवस्तेक
ल्पन्ताᳫंसंवत्सरस्तेकल्पताम् ॥ प्रेत्याऽएत्यैसञ्चाचप्रचसारय॥
सुपर्णाचिदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद ४५ [ ११ ] इतिसंहिता
यांसप्तविᳫंशोऽध्यायः २७ होतायक्षदेकादशदेवंबर्हिद्दादशपुनरप्येवं
चत्वारःषट्चत्वारिᳫंशत् ॥ होतायक्षत् ॥ होतायक्षत्समिधेन्द्रमिड
स्पदेनाभापृथिव्याऽअधि ॥ दिवोवर्ष्मन्त्समिध्यतऽओजिष्ठश्चर्ष
णीसहांवेत्वाज्यस्यहोतर्यज १ होतायक्षत्तनूनपातमूतिभिः॥ हो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तांयक्षत्तनूनपातमूतिभिर्ज्जेतारमपराजितम् ॥ इन्द्रन्देवꣳस्वर्विदम्पु
थिभिर्म्मधुमत्तमैर्न्नराशꣳसेनतेजसाव्वेत्वाज्ज्यस्यहोतर्यजं २ होता
यक्षदिडाभिरिन्द्रम् ॥ होतायक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्य
म् ॥ देवोदेवैःसवीर्यौव्वज्रहस्तःपुरन्दरोव्वेत्वाज्ज्यस्यहोतर्यज ३
होतायक्षद्बर्हिषीन्द्रम्॥ होतायक्षद्बर्हिषीन्द्रन्निषद्वरंव्वृषभन्नर्यापसम्॥
व्वसुभीरुद्रैरादित्यैःसयुग्भिर्बर्हिरासदद्वेत्वाज्ज्यस्यहोतर्यजं ४ हो
तायक्षदोजोनवीर्यꣳसहोद्वारऽइन्द्रमवर्द्धयन्॥ सुप्रायणाऽअस्मि
न्यज्ञेव्विश्रयन्तामृतावृधोद्वारऽइन्द्रायमीढुषेव्यंत्वाज्ज्यस्यहोतर्य
जं ५ होतायक्षदुषेऽइन्द्रस्य ॥ धेनूसुदुघेमातरामही ॥ सवातरौनते ४१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जंसाबृत्समिन्द्रंमवर्द्धतांबीतामाज्यंस्यहोतुर्यजं६ होतांयक्षुद्दैव्या
होतांरा ॥ भिषजासखांयाहविषेन्द्रम्भिषज्यतः ॥ कुवीदेवोप्प्रचे
तसाविन्द्रांयधन्तऽइन्द्रियंबीतामाज्यंस्यहोतुर्यजं ७ होतांयक्ष
त्तिस्रोदेवीः ॥ होतांयक्षत्तिस्रोदेवीर्न्नभेषजन्त्रयंस्त्रिधातवोपसऽइडा
सरस्वतीभारतीमही ः ॥ इन्द्रंपत्नीर्हविष्म्मंतीर्व्यन्त्वाज्यंस्यहोत
र्यजं ८ होतांयक्षुत्वष्टांरमिन्द्रम् ॥ होतांयक्षुत्वष्टांरमिन्द्रन्देवम्भि
षजंᳬसुयजंङ्घृतश्श्रियंम् ॥ पुरुरूपंᳬसुरेतंसम्मघोनमिन्द्रांयत्वष्टाद
धंदिन्द्रियाणिवेत्वाज्यंस्यहोतुर्यजं ९होतांयक्षद्वनस्पतिंᳬशमिता
रंम् ॥ होतांयक्षद्वनस्पतिंᳬशमितारंᳬशतक्क्रतुन्धियोजोष्टांरमिन्द्रि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. यम् ॥ मन्द्वांसमुजन्पथिभिंःसुगेभिःस्वदांतिषज्ञम्मधुनाघृतेनवेत्वा उ.अ.
४२ ज्यंस्यहोतुर्ष्षजं १० होतांषक्षदिन्द्रंस्वाहां ॥ होतांषक्षदिन्द्रं २८
स्वाहाज्यंस्यस्वाहामेदंसःस्वाहांस्तोकानांस्वाहास्वाहांकृतीनां
स्वाहांहव्यसूक्तीनाम् ॥ स्वाहांदेवाऽआंज्यपाजुषाणाऽइन्द्रऽआ
ज्यंस्यव्यन्तुहोतर्ष्षजं ११ [ ११ ] देवम्बर्हिरिन्द्रंसुदेवन्देवैर्वीर
वंत्स्तीर्णंवेद्यामवर्द्धयत् ॥ वस्तोर्वृतम्प्राक्तोभृतंरायाबर्हिष्मतो
त्यंगाद्वसुवनेंवसुधेयंस्यवेतुष्षजं १२ देवीर्द्वारः ॥ देवीर्द्वारऽइन्द्रंस
ङ्घातेवीड्वीर्यामंन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेणंचमीवतापा ४२
र्वाणंरेणुकंकाटन्नुदन्तांवसुवनेंवसुधेयंस्यव्यन्तुषजं १३ देवीऽउ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षासानक्ता ॥ देवीऽउषासानक्तेन्द्रंऽवयसाबृहन्तिंगिर्वाहसं । इन्द्रायासिद्धैऽ षसुव्यवसरतिबदूधवयः वसुपस्तिब्बृहतीविषुवायऽस्वन्द्रशोजोऽबाऽ। ००००००

षासानक्ता ॥ देवीऽउषासानक्तेन्द्रंऽवसुज्ञेष्प्रंयुत्यह्वेताम् ॥ देवीर्विशः प्प्रायांसिष्टांऽसुप्प्रीतेसुधितेव्वसुवनेव्वसुधेयंस्यवीतांऽयज १४ दे वीजोष्ट्री ॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रंमवर्द्धताम् ॥ अयाव्यन्या घाद्वेषांऽस्यान्यावक्षद्वसुवाऽर्योणियजंमानायशिक्षितेव्वसुवनेव्वसु धेयंस्यवीतांऽयज १५ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहूतीदुघेसुदुघे पयसेन्द्रंमवर्द्धताम् ॥ इषमूर्ज्जमन्यावक्षत्साग्धिऽसपीतिमन्यानवे नपूर्व्यन्दयंमानेपुराणेनवमधातामूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जयंमानेव्वसुवा र्योणियजंमानायशिक्षितेव्वसुवनेव्वसुधेयंस्यवीतांऽयज १६ देवा दैव्या ॥ देवादैव्याहोतारादेवमिन्द्रंमवर्द्धताम् ॥ हताघंशऽसावाभा

संहि. ४३ उ.अ. २८

द्वांवसुवारुर्षाँणिषजंमानायशिक्षितौवंसुवनेवसुधेयंस्यवीतांरुषजं॥
१७ देवीस्तिस्रः । देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन् ॥ अ
स्पृक्षद्भारतीदिवंरुद्रैर्यज्ञंसरस्वतीडावसुमतीगृहान्वंसुवनेवसुधे
यंस्यव्यन्तुषजं १८ देवऽइन्द्रः ॥ देवऽइन्द्रोनराशंसंस्त्रिवरूथस्त्रिब
न्धुरोदेवमिन्द्रमवर्द्धयत् ॥ शतेनंशितिपृष्ठानामाहितःसहस्रेणप्प्रवं
र्त्तेमित्रावरुणेदस्यहोत्रमर्हतोबृहस्पतिस्तोत्रमश्विनाध्वर्यवंवसु
वनेवसुधेयंस्यवेतुषजं १९ देवोदेवैः ॥ देवोदेवैर्वनस्पतिर्हिरण्यप
र्णोमधुशाखःसुपिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दिवमग्रेणास्पृक्षदा
न्तरिक्षम्पृथिवीमदृंहीद्वसुवनेवसुधेयंस्यवेतुषजं २० देवम्बर्हिः ॥

४३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवम्बुर्हिर्बारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासुस्त्थमिन्द्रेणासंन्नमु
न्त्याबर्हीᳬंष्युभ्यभूद्वसुवनेंबसुधेयंस्यबेतुयज २१ देवोऽअग्निः ॥
देवोऽअग्निःस्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्विष्ट
मद्यकरोतुनोवसुवनेंवसुधेयंस्यवेतुयजं २२ अ॒ग्निमद्यहोतारमवृ
णीतायंयजमानःपचन्पक्तीःपचंन्पुरोडाशंम्बध्नन्निन्द्रायच्छागंम्
॥ सूपस्त्थाऽअद्यदेवोवनस्पतिरभवदिन्द्रायच्छागेन ॥ अघत्तम्मेद
स्तःप्रतिपचताग्ग्रंभीदवीवृधत्पुरोडाशेन॥त्वामद्यऽऋषेर३[१२]हो
तायक्षत् ॥ होतायक्षत्समिधानम्महद्यशःसुसमिद्धंवरेण्यमग्निमिन्द्रं
वयोधसम् ॥ गायत्रीञ्छन्दऽइन्द्रियन्त्र्यविङ्गांवयोदधद्वेत्वाज्ज्यस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



होतुर्यजं २४ होतायक्षत्तनूनपातमुद्भिदंम्॥होतायक्षत्तनूनपातमु उ.अ.
द्भिदंय्यङ्गर्भमदितिर्दधेशुचिमिन्द्रंव्वयोधसंम् ॥ उष्णिहञ्छन्दऽइ २८
न्द्रियन्दित्यवाहङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहोतुर्यजं २५ होतायक्षदी
डेन्यमीडितम् ॥ होतायक्षदीडेन्यमीडितंवृत्रहन्तमामिडाभिरीड्यꣳ
सहꣳसोमामिन्द्रंव्वयोधसंम् ॥अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चाविङ्गांव्वयो
दधद्वेत्वाज्ज्यस्यहोतुर्यजं २६ होतायक्षत्सुबर्हिषम्पूषण्वन्तंम्॥हो
तायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यꣳ सीदन्तम्बर्हिषिप्रियेमृतेन्द्रंव्व
योधसंम् ॥ बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहो
तुर्यजं २७ होतायक्षद्व्यचस्वतीः सुप्रायणाः ॥ होतायक्षद्व्य ४४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चंस्वती ३ सुष्प्रायुणाऽऋंतावृधोद्वारोंदेवीर्हिरण्ययींर्ब्रह्मणामिन्द्रंव
योधसंम ॥ पङ्क्तिश्छन्दंऽइहेन्द्रियन्तुर्यवाहङ्गावयोदधुद्व्यन्त्वाज्य
स्यहोतुर्यजं २८ होतांयक्षत्सुपेशंसासुशिल्पे ॥ वृहतीऽउभेनक्तो
षासानदंर्शतेविश्श्वमिन्द्रंवयोधसंम ॥ त्रिष्टुभुञ्छन्दंऽइहेन्द्रियम्पष्ठ
वाहङ्गावयोदधंद्वीतामाज्यंस्यहोतुर्यजं २९ होतांयक्षत्प्रचेतसादे
वानांमुत्तमंयशोहोतारादैव्याकवीसयुजेन्द्रंवयोधसंम ॥ जगती
ञ्छन्दंऽइन्द्रियमनड्वाहङ्गांवयोदधंद्वीतामाज्यंस्यहोतुर्यजं ३० हो
तांयक्षत्पेशंस्वतीस्तिस्रः ॥ होतांयक्षत्पेशंस्वतीस्तिस्रोदेवीर्हिरण्य
यीर्भारंतीर्बृहतीर्म्महीःपतिमिन्द्रंवयोधसंम ॥ विराजुञ्छन्दंऽइहे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. न्द्रियन्धेनुङ्गान्नवयोदधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ३१ होताषक्षत्सु उ.अ.
४५ रेतंसुन्त्वष्टारम् ॥ होताषक्षत्सुरेतंसुन्त्वष्टारम्पुष्टिवर्द्धनꣳरूपाणिबि २८
ꣳभ्रतम्पृथक्पुष्टिमिन्द्रंवयोधसम् ॥ द्विपदञ्छन्दऽइन्द्रियमुक्षाणङ्गा
न्नवयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ३२ होताषक्षद्वनस्पतिꣳशमिता
रम् ॥ होताषक्षद्वनस्पतिꣳशमितारꣳशतक्क्रतुꣳहिरण्यपर्णमुक्थिनं
ꣳरशनाम्बिꣳभ्रतंवशिम्भगमिन्द्रंवयोधसम् ॥ ककुभञ्छन्दऽइहेन्द्रि
यंवशांवेहतङ्गांवयोदधद्वेत्वाज्ज्यस्यहोतर्य्यज ३३ होताषक्षत्स्वा
हाकृतीरग्निम् ॥ होताषक्षत्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्वरुणम्भे ४५
षजङ्कविङ्क्षत्रमिन्द्रंवयोधसम् ॥ अतिच्छन्दसञ्छन्दऽइन्द्रियम्बृहद

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षुभङ्गांव्वयोदधद्यन्त्वाज्ज्यंस्युहोतर्य्यज ३४ [ ११ ] देवम्बुर्हिः ॥
देवम्बुर्हिर्व्वयोधसंन्देवमिन्द्रंमवर्द्धयत् ॥ गायुत्र्याच्छन्दंसेन्द्रियञ्च
क्षुरिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयस्यवेतुयज ३५ देवीर्द्वारंः ॥ देवीर्द्वा
रोंव्वयोधसुᳯशुचिमिन्द्रंमवर्द्धयन् ॥ उष्णिहाच्छन्दंसेन्द्रियम्प्राण
मिन्द्रेव्वयोदधंद्वसुवनेंवसुधेयंस्यव्यन्तुयज ३६ देवीऽउषासानक्ता॥
देवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ अनुष्टुभाच्छन्दंसेन्द्रियम्ब
लमिन्द्रेव्वयोदधंद्वसुवनेंव्वसुधेयंस्यव्वीतांय्यज ३७ देवीजोष्ट्री ॥ दे
वीजोष्ट्रीव्वसुधितीदेवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ बृहत्या
च्छन्दसेन्द्रियᳯश्रोत्रमिन्द्रेव्वयोदधंद्वसुवनेंवसुधेयंस्यव्वीतांय्यज ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





३८ देवीऽऊर्ज्जाहुती ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रंवयोधसं
न्देवीदेवमंवर्द्धताम् ॥ पङ्क्त्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेवयोदधंद्वसु
वनेवसुधेयंस्यवीतांऽयज ३९ देवादैव्या ॥ देवादैव्याहोतारादेवमि
न्द्रंवयोधसंन्देवौदेवमंवर्द्धताम् ॥ त्रिष्टुभाछन्दसेन्द्रियत्विषिमिन्द्रेव
योदधंद्वसुवनेवसुधेयंस्यवीतांऽयज ४० देवीस्तिस्रः ॥ देवीस्तिस्र
स्तिस्रोदेवीर्वयोधसम्पतिमिन्द्रमवर्द्धयन् ॥ जगत्याच्छन्दसेन्द्रिय
ꣳशूषमिन्द्रेवयोदधंद्वसुवनेवसुधेयंस्यद्यन्तुयज ४१ देवोनराशꣳ
सः ॥ देवोनराशꣳसोदेवमिन्द्रंवयोधसंन्देवोदेवमंवर्द्धयत् ॥ विरा
जाच्छन्दसेन्द्रियꣳरूपमिन्द्रेवयोदधंद्वसुवनेवसुधेयंस्यवेतुयज ४२ ४६

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवोवनस्पतिं ÷ ॥ देवोवनस्पतिर्द्देवमिन्द्रंवयोधसन्देवोदेवमंवर्द्ध
यत् ॥ द्विपदाच्छन्दसेन्द्रियम्भगमिन्द्रेवयोदधद्वसुवनेवसुधेयस्यवे
तुयज ४३ देवम्बर्हिः ॥ देवम्बर्हिर्वारितीनान्देवमिन्द्रंवयोधसन्देव
न्देवमंवर्द्धयत् ॥ ककुभाच्छन्दसेन्द्रियंरुयशःऽइन्द्रेवयोदधद्वसुवनेव
सुधेयस्यवेतुयज ४४ देवोऽअग्निः ॥ स्विष्टकृद्देवमिन्द्रंवयोधसन्दे
वोदेवमंवर्द्धयत् ॥ अतिच्छन्दसाच्छन्दसेन्द्रियक्षत्रमिन्द्रेवयोदधद्
सुवनेवसुधेयस्यवेतुयज ४५ अग्निमद्यहोतारमवृणीतायंरुयजमा
नःपचन्पक्तीःपचन्पुरोडाशम्बधान्निन्द्रायवयोधसेच्छागम् ॥ सू
पस्थाऽअद्यदेवोवनस्पतिरभवदिन्द्रायवयोधसेच्छागेन ॥ अघत

For Private and Personal Use Only

म्मैदुस्तऽप्प्रतिंपचुताग्ग्रभीदर्व्वीवृंघत्पुरोडाशैन ॥ त्वामुद्द्यऽऋंषे ४६ उ.अ
[१२]४ इतिसंहितायांऽअष्टाविंᳬशोऽध्यायः२८समिद्धोअंजन्नेकाद २९
शषदकंदस्त्रयोदशसमिद्धोअद्यद्वादशकेतुंकृण्वंश्चतुर्विंᳬशतिश्चत्वारःष
ष्टिः ॥ समिंद्धोऽअञ्जन् ॥ समिंद्धोऽअञ्जन्कृदंरम्मतीनाङ्घृतमंग्ग्नेमधु
मत्पिन्वंमानऽ ॥ वाजीवहंन्वाजिनंञ्जातवेदोदेवानांवक्षिप्प्रियमा
सधस्त्थंम् १ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथोदेवयानांन्प्रजानन्वा
ज्ज्यप्प्येतुदेवान् ॥ अनुंत्वासप्प्ते प्प्रदिशंः सचन्ताᳬस्वधामस्म्मैय
जंमानायधेहि २ ईड्यश्च ॥ ईड्यश्चासिवन्द्यश्चवाजिन्नाशुश्चासि ४७
मेद्ध्यश्चसप्प्ते ॥ अग्निष्ट्वांदेवैर्व्वसुंभिःसजोषाःप्प्रीतंवन्हिंवहतुजात

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदाः ३ स्तीर्म्बर्हिः सुष्टरीमाजुषाणोरुपृथुप्प्रथमानम्पृथिव्या
म् ॥ देवेभिर्युक्तमदितिःसजोषाःस्स्योनङ्कृण्वानासुवितेदधातु ४
एताऽउवः ॥ सुभगाविश्श्वरूपाविपक्षोभिः श्रयमाणाऽउदातैः॥ऋ
ष्वाःसुतीःकवषःशुम्भमानाद्वारोदेवीःसुप्प्रायणाभवन्तु ५ अन्तु
रामित्रावरुणा ॥ अन्तरामित्रावरुणाचरन्तीमुखंयज्ञानामभिसंवि
दाने ॥ उषासावाᳫंसुहिरण्येसुशिल्पेऽऋतस्ययोनाविहसादया
मि ६ प्रथमावाम् ॥ प्रथमावाᳫंसरथिनासुवर्णादेवौपश्यन्तौभुवना
निविश्श्वा ॥ अपिप्प्रयञ्चोदनावाम्मिमानाहोताराज्योतिःप्प्रदि
शादिशन्ता ७ आदित्यैर्न्नः ॥ आदित्यैर्न्नोभारतीवष्टुयज्ञᳫंसरस्वती

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुहरुद्रैर्न्नैऽआवीत् ॥ इडोपहूताव्वसुभिःसुजोषायुज्ञन्नोदेवीरमृतेषुध
त्त ८ त्वष्टांव्वीरम् ॥ त्वष्टांव्वीरन्देवकामञ्जतानुत्वष्टुरर्व्वाजायतऽआशु
रश्श्वः ॥ त्वष्टेदंव्विश्श्वम्भुवनञ्जजानबुहोःकुर्तारमिहयक्षिहोतः ९
अश्श्वोघृतेनुत्मन्न्यासमक्तुऽउपदेवाः ॥ ऽऋतुशःपाथंऽएतु ॥ व्वनस्प
तिर्देवलोकम्प्रंजानन्नग्निनाहृव्यास्वंदितानिव्वक्षत् १० प्रजापतेस्त
पंसा ॥ व्वावृधानःसुद्योजातोदधिषेयुज्ञमग्ने ॥ स्वाहाकृतेनहुविषा
पुरोगायाहिसाद्ध्याहृविरंदन्तुदेवाः ११ [११] यदक्रन्दः ॥ प्प्रथ
मञ्जायमानऽउद्यन्त्समुद्राद्रुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबा
हूऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन् १२ यमेनदत्तम् ॥ यमेनदुत्तन्त्रित



For Private and Personal Use Only

ऽऐनमायुनगिन्द्रंऽएणम्प्रथमोऽअद्ध्यंतिष्ठत् ॥ गन्धर्वोऽअंस्यरशु
नामंगृभ्णात्सूरादश्श्वंवसवोनिरंतष्ट १३ असिंषमः॥ असिंषमो
ऽअस्यादित्योऽअंर्वन्नसिंत्रितोगुह्येनव्रतेनं ॥ असिसोमेंनसमयाविं
पृंक्तऽआहुस्तेत्रीणिंदिविबन्धंनानि १४ त्रीणिंते ॥ त्रीणिंतऽआहु
र्दिविबन्धंनानित्रीण्युप्प्सुत्रीण्यंतःसंमुद्रे ॥ उतेवंमेवरुंणश्छन्त्स्यर्व
न्यत्रांतऽआहुःपंरमञ्जनित्रंम् १५ इमातेंवाजिन्नवमार्ज्जनानीमाश
फानांᳩंसनितुर्न्निधानां ॥ अत्रांतेभुद्रारंशनाऽअंपश्यमृतस्युयाऽअं
भिरक्षन्तिगोपाः १६ आत्मानंन्ते ॥ आत्मानंन्तेमनंसारादंजानाम्
वोदिवापुतयंन्तम्पतङ्गम् ॥ शिरोंऽअपश्यपुथिभिःसुगेभिंररेणुभिर्ज्जे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हमानम्पतत्रि १७ अत्रांते ॥रूपमुंत्तममंपश्युजिगीषमाणमिषऽआ 
पदेगोः ॥ सुदातेमर्तोऽअनुभोगमानुडादिद्दुसिंष्ठुऽओषंधीरजीगः १८
अनुंत्वा ॥ अनुंत्वारथोऽअनुमरुर्य्योऽअर्वुन्ननुगावोनुभगंःकुनीनाम्
॥ अनुव्रातांसस्तवंसुकख्यमीयुरनुदेवामंमिरेवीर्युंर्सन्ते १९ हिरंण्य
शृगोयंः ॥ हिरंण्यशृङ्गायोऽअस्यपादामनोजवाऽअवंरऽइन्द्रंआसी
त् ॥ देवाऽइदंस्यहविरद्यमायन्योऽअर्वन्तम्प्रथमोऽअुद्ध्यतिष्ठत् २०
ईर्म्मान्तासःसिलिकमद्ध्यमासः ॥ ईर्म्मान्तासःसिलिकमद्ध्यमा
सःसंशूरंणासोदिव्यासोऽअत्यां ः ॥ हुंसाऽईवश्रेणिशोयंतन्तेस 
दाक्षिषुर्दिव्यमज्ममश्वाःर्२१तवशरीरम् ॥ तवशरीरम्पतयिष्ण्व

For Private and Personal Use Only

र्वृन्तवांचित्तंवातंऽइवध्रजींमान् ॥ तवशृङ्गांणिविष्ठिंतापुरुत्रारंण्येषु जर्भुराणाचरन्ति २२ उपप्र ॥ उपप्रागाच्छसंनंवाज्यर्वादेवद्री चामर्नसादीद्ध्यांनः ॥ अजःपुरोनीयतेनाभिरस्यानुंपश्चात्कवयो यन्तिरेभाः २३ उपप्र ॥ उपप्रागांत्परमंयत्सधस्थमर्वाः ॥ ऽअ च्छांपितरम्मातरंञ्च ॥ अद्यादेवाजुष्टतमोहिगम्म्याऽअथाशांस्तेदा शुषेवार्य्याणि २४ [ १३ ] समिद्धोऽअद्य ॥ मनुषोदुरोणेदेवोदेवा न्यंजासिजातवेदः ॥ आचवहंमित्रमहश्चिकित्वान्त्वन्दूतःकविरं प्रचेताः २५ तनूंनपात्पथः ॥ तनूंनपात्पथऽऋतस्ययानान्मध्वांस मञ्जन्त्स्वदयासुजिह्व ॥ मन्मांनिधीभिरुतयज्ञमृन्धंदेवत्राचंकृणुह्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५० हुर्नः २६ नराशꣳसस्यमहिमानम् ॥ नराशꣳसस्यमहिमानमेषा
मुपस्तोषामयजतस्ययज्ञैः ॥ येसुक्रतवꣳशुचयोधियन्धाःस्वदन्ति २९
देवाऽउभयानिहव्या २७ आजुह्वानऽईड्यः ॥ आजुह्वानऽईड्योव
न्द्यश्चायाह्यग्नेवसुभिꣳसजोषाः ॥ त्वन्देवानामसियह्वहोतासऽएना
न्यक्षीषितोयजीयान २८ प्राचीनम्बर्हिःप्रदिशापृथिव्यावस्तोरस्या
वृज्यतेऽअग्रेऽअह्नाम् ॥ व्युप्रथतेवितरंवरीयोदेवेभ्योऽअदितये
स्योनम् २९ व्यचस्वतीरुर्विया ॥ विश्रयन्ताम्पतिभ्योनजनयः
शुम्भमानाः ॥ देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्राय ५०
णाः ३० आसुष्वयन्ती ॥ यजतेऽउपाकेऽउषासानक्तासदतान्नि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योनौ॥ द्विह्येसोषणेबृहतीसुरुक्मेऽअधिश्श्रियंᳬशुक्रपिशन्दधानेᳬ३१
दैव्याहोतारा ॥ प्रथमासुवाचामिमंनासुज्ञम्मनुषोसजध्यै॥ प्रचो
दयन्ताविदथेषुकारूप्राचीनज्योतिःप्रदिशादिशन्ता ३२ आनः॥
आनोसुज्ञम्भारतीतूयमेत्विडामनुष्ष्वदिहचेतयन्ती ॥ तिस्रोदेवीर्ब
र्हिरेदᳬस्योनᳬसरस्वतीस्वपसःसदन्तु ३३ यऽइमे ॥ द्यावापृथिवी
जनित्रीरूपैरपिᳬशद्भुवना विश्वा ॥ तमद्यहोतरिषितोयजीया
न्देवन्त्वष्टारमिहयक्षिविद्वान् ३४ उपावसृजत्मन्या॥ समञ्जन्देवाना
म्पाथऽऋतुथाहवीᳬषि ॥ वनस्पतिःशमितादेवोऽअग्निःस्वदन्तुह
व्यम्मधुनाघृतेन ३५ सद्योजातः॥ सद्योजातोव्यमिमीतयज्ञमग्नि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





देवानामभवत्पुरोगाः ॥ अस्यहोतुःप्प्रदिश्यृतस्यंवाचिस्वाहाकृतꣳ
हविरदन्तुदेवाः ३६[१२] केतुङ्कृण्वन् ॥ केतुङ्कृण्वन्नकेतवेपेशोमर्या
ऽअपेशसे ॥ समुषद्भिरजायथाः ३७ जीमूतस्येवभवति ॥ जीमूत
स्येवभवतिप्प्रतीकंयद्वर्म्मीयातिसमदामुपस्थे ॥ अनाविद्धयात
न्वाजयत्वꣳसत्वावर्म्मणोमहिमापिपर्त्तु ३८ धन्न्वनागाः ॥ धन्न्व
नागाधन्न्वनाजिञ्जयेमधन्न्वनातीव्राःसमदोजयेम ॥ धनुःशत्रोरप
कामङ्कृणोतिधन्न्वनासर्वाःप्प्रदिशोजयेम ३९ वक्ष्यन्तीवेत् ॥ वक्ष्य
न्तीवेदागनीगन्तिकर्ण्णम्प्रियꣳ सखायम्परिषस्वजाना ॥ योषेव
शिङ्क्ते वितताधिधन्न्वञ्ज्याऽइयꣳसमनेपारयन्ती ४० तेऽआचरन्ती ॥



For Private and Personal Use Only

तेऽआचरन्तीसमनेवयोषामातेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्
न्विद्ध्यताᳪसंविदानेऽआर्त्नीऽइमेविष्फुरन्तीऽअमित्रान् ४१ ब
ह्वीनाम्पिता ॥ बहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिः
सङ्काःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः ४२ रथेतिष्ठन् ॥ र
थेतिष्ठन्नयतिवाजिनःपुरोयत्रयत्रकामयतेसुषारथिः ॥ अभीशूना
म्महिमानम्पनायतमनःपश्चादनुयच्छन्तिरश्मयः ४३ तीव्रान्घो
षान् ॥ तीव्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिः सहवाजय
न्तः ॥ अवक्रामन्तःप्रपदैरमित्रान्क्षिणन्तिशत्रूँ१ ॥ रनपव्ययन्तः
४४ रथवाहनᳪहविः ॥ रथवाहनᳪहविरस्यनामयत्रायुधन्निहितम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

स्युवर्म्म ॥ तन्त्रारथमुपशग्म ऽसंदेमाविश्श्वाहांवयऽसुमनस्यमानाः
४५ स्वादुषऽसदःपितरः ॥ स्वादुषऽसदःपितरोवयोधाःकृच्छ्रेश्श्रि
तःशक्तीवन्तोगभीराः॥ चित्रसेनाऽइषुबलाऽअमृद्धाःसतोवीराऽउर
वोव्रातसाहाः ४६ ब्राह्मणासःपितरः ॥ ब्राह्मणासःपितरःसो
म्म्यासःशिवेनोद्यावापृथिवीऽअनेहसा ॥ पूषान्नःपातुदुरितादृतावृ
धोरक्षामाकिन्नोऽअघशऽसऽईशत ४७ सुपर्णवस्ते ॥ मृगोऽअस्या
दन्तोगोभिःसन्नद्धापततिप्प्रसूता ॥ यत्रानरःसञ्चविचद्रवन्तितत्रा
स्म्मभ्यमिषवःशर्म्मयऽसन् ४८ ऋजीतेपरि ॥ वृङ्धिनोश्म्माभव
तुनस्तनूः ॥ सोमोऽअधिब्रवीतुनोदितिःशर्म्मयच्छतु ४९आजङ्घ ५२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्ति ॥ आजङ्घन्तिसान्वेषाञ्जघनाः ॥ ऽउपंजिघ्नते ॥ अश्श्वाँज
निष्प्रचेतसोऽश्श्वान्त्समत्सुचोदय ५० अहिरिवभोगैःपर्य्येतिबाहु
ञ्ज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्श्वाँवयुनानिविद्वान्पुमा
न्पुमाꣳसम्परिपातुविश्श्वतः ५१ वनस्प्पतेवीड्वङ्गः ॥ वनस्प्पतेवीड्व
ङ्गोहिभूयाऽअस्म्मत्सखाप्प्रतरणःसुवीरः ॥ गोभिःसन्नद्धोऽअसि
वीडयस्वास्थातातेजयतुजेत्त्वानि ५२ दिवःपृथिव्याः ॥ दिवःपृ
थिव्याःपर्य्योजऽउद्धृतंवनस्प्पतिभ्यःपर्य्याभृतꣳसहः ॥ अपामो
ज्म्मानम्परिगोभिरावृतमिन्द्रस्यवज्रꣳहविषारथंयज ५३ इन्द्र
स्यवज्रः ॥ इन्द्रस्यवज्रोमरुतामनीकम्मित्रस्यगर्भोवरुणस्यना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सं॰हि॰ भिः ॥ सेमान्नोहव्यदातिञ्जुषाणोदेवरथप्प्रतिहव्यागृभाय ५४ उपं उ.अ.
५३ श्श्वासय ॥ पृथिवीमुतद्याम्पुरुत्रातेमनुतांविष्ठितञ्जगत् ॥ सदुन्दुभे २९
सजूरिन्द्रेणदेवैर्दूराद्दवीयोऽअपसेधशत्रून् ५५ आक्रन्दय ॥ आक्र
न्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः ॥ अपप्प्रोथदु
न्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिवीडयस्व ५६ आमूः ॥ आमूरं
जप्प्रत्त्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्वावदीति ॥ समश्श्वपर्णाश्श्चरन्ति
नोनरोस्म्माकमिन्द्ररथिनोजयन्तु ५७ आग्नेयःकृष्ष्णग्ग्रीवः॥ सा
रस्वतीमेषिबभ्रुःसौम्म्यःपौष्ष्णःश्यामःशितिपृष्ठोबार्हस्पत्त्यः ॥ ५३
शिल्प्पोवैश्श्वदेवऽऐन्द्रोरुणोमारुतःकल्म्माषऽऐन्द्राग्नःसंहितोधो

For Private and Personal Use Only

रांमःसावित्रोवारुणःकृष्णऽएकशितिपात्पेत्वः ५८ अग्नयेनीकव
ते ॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वानुधोरांमौसावित्रौपौष्णौरंजु
तनाभीवैश्वदेवौपिशङ्गौतूपरौमारुतः कल्माषऽआग्नेयःकृष्णो
जःसारस्वतीमेषीवारुणःपेत्वः ५९ अग्नयेगायत्राय ॥ त्रिवृतेराथ
न्तरायाष्टाकपाल ऽ इन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायैकादशकपा
लोविश्वेभ्योदेवेभ्योजागतेभ्यः सप्तदशेभ्योवैरूपेभ्योद्वाद
शकपालोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यांवैराजा
भ्यांपयस्याबृहस्पतयेपाङ्क्तायत्रिणवायशाक्वरायचरुः सवित्र
ऽऔष्णिहायत्रयस्त्रिंशायरैवतायद्वादशकपालःप्राजापत्यश्चरु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 रदित्यैविष्णुंपत्न्यैचरुरग्नयेवैश्वानरायद्वादशकपालोनुमत्याऽअ 
 ष्टाकंपालः ६० [२४] ॥४॥ इतिसंहितापाठेएकोनत्रिंशोऽध्यायः २९ 
देवसावितःषट्तपसेकौलालंषोडशद्वौद्वाविंशतिः ॥ देवंसवितः ॥
देवंसवितःप्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्वःकेत
पूःकेतन्नःपुनातुवाचस्पतिर्वाचंन्नःस्वदतु १ तत्सवितुः ॥ तत्स
वितुर्वरेण्यम्भर्गोदेवस्यधीमहि॥धियोयोनःप्रचोदयात्२विश्वा
निदेव ॥ सवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ३ विभक्ता
रंहवामहे॥ विभक्तारंहवामहेवसोश्चित्रस्यराधसः ॥ सवितारं 
नृचक्षसम् ४ ब्रह्मणेब्राह्मणम् ॥ ब्रह्मणेब्राह्मणक्षत्रायराजन्य

For Private and Personal Use Only

म्मुरुद्ध्योग्वैश्यन्तपंसेशूद्रन्तमंसेतस्करन्नारकायंवीरहणंम्पाप्मनेक्ली
बमांक्रयायांऽअयोगूङ्कामांयपुँश्चलूमतिक्रुष्टायमागधम् ५ नृत्तायं
सूतम् ॥ नृत्तायंसूतङ्गीतायंशैलूषन्धर्म्मायसभाचरन्नरिष्ठांयैभीमल
न्नर्म्मायंरेभꣳहसांयकारिमानन्दायंस्त्रीषखम्प्रमदे कुमारीपुत्रम्मेधा
यैरथकारन्धैर्य्यायतक्षाणम् ६ [ ६ ] तपंसेकौलालम् ॥ तपंसेकौ
लालम्मायायैकर्म्मारꣳरूपायंमणिकारꣳशुभेवपꣳशरव्यायाऽइषु
कारꣳहेत्यैधंनुष्कारङ्कर्म्मणेज्याकारन्दिष्टायंरज्जुसर्ज्जम्मृत्यवेमृगयु
मन्तकायश्श्वनिनंम् ७ नदीभ्यंःपौञ्जिष्ठम् ॥ नदीभ्यंःपौञ्जिष्ठमृ
क्षीकांभ्योनैषादम्पुरुषव्याघ्रायंदुर्म्मदङ्गन्धर्वाप्सरोभ्योव्रात्यंम्प्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युग्भ्य॑ऽउन्मत्त॑ᳪ सर्प्पदेवजनेब्भ्योऽप्प्रतिपदमयेब्भ्यः कितवमीर्य्यं
ताया ऽअकितवम्पिशाचेब्भ्यो विदलकारीं यातुधानेब्भ्यः कण्टकी
कारीम् ८ सन्धयें जारम् ॥ सन्धयें जारङ्गेहायोपपतिमार्त्यै परिवि
त्तन्निर्ऋत्यै परिविविदानमराध्द्या ऽएदिधिषुःपतिन्निष्कृत्यै पेशस्कारी
ᳪ संज्ञानाय स्मरकारीम्प्रकामोद्यायोपसदं वर्णायानुरुधम्बलाय
पदाम् ९ उत्सादेब्भ्यः कुब्जम् ॥ उत्सादेब्भ्यः कुब्जम्प्रमुदे वामन
न्द्वाब्भ्यः स्रामᳪ स्वप्नायान्धमधर्म्माय बधिरम्पवित्राय भिषजम्प्रज्ञा
नाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया ऽअभिप्रश्निनम्म
र्य्यादायै प्रश्नविवाकम् १० अर्म्मेब्भ्यो हस्तिपम् ॥ अर्म्मेब्भ्यो



For Private and Personal Use Only

हस्तिपञ्जवायांश्श्वपम्पृष्ट्यैंगोपालंबोऽर्षायाविपालन्तेजंसेजया
लमिरांयैकीनाशङ्कीलालांयसुराकारम्भद्रायंगृहप ७ श्रेयसेवित्तय
माध्द्यंक्ष्यायानुक्षत्तारम् ११ भायैदाबाहुरम् ॥ भायैदाबाहुरम्पु
भायांऽअग्न्येधम्बधस्यांविष्टपायाभिषेक्तारंबर्षिष्ठायनाकायपरिवे
ष्टारन्देवलोकायपेशितारम्मनुष्यलोकायप्रकरितार ६ सर्वेभ्यो
लोकेभ्यंऽउपसेक्तारमवऽऋत्यैबधायोपमन्थितारम्मेधायवासः प
ल्पूलीम्प्रकामायरजयित्रीम् १२ ऋतयैस्तेनहृदयम् ॥ ऋतयैस्ते
नहृदयंवैरंहत्यायपिशुनंविविक्त्यैक्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारम्ब
लायानुचरम्भूम्नेपरिष्कन्दम्प्रियायप्रियवादिनमरिष्ट्याऽअश्व

सादᳪस्वर्गायलोकायभागदुघंवर्षिष्ठायनाकायपरिवेष्टारम् १३ म
न्यवेंयस्तापम् ॥ मन्यवेंयस्तापङ्क्रोधायनिसरंयोगाययोक्तारᳪशो
कायाभिसर्तारङ्क्षेमायविमोक्तारमुत्कूलनिकूलेभ्यंस्त्रिष्ठिनंवपुषेमा
नस्कृतᳪशीलायांजनीकारीन्निर्ऋत्यैकोशकारींयमायासूम् १४ य
मायंयमसूम् ॥ यमायंयमसूमथर्वभ्योवंतोकाᳪसंवत्सरायपर्या
यिणीम्परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायाति
ष्कद्वरींवत्सरायविजंर्जराᳪसंवत्सरायपलिक्नीमृभुभ्योंजिनसन्ध
ᳪसाध्येभ्यंश्चर्म्मम्नम् १५ सरोभ्योधैवरम् ॥ सरोभ्योधैवरमु
पस्थावंराभ्योदाशंवैशन्ताभ्योबैन्दन्नड्वलाभ्यःशौष्कम्पारायमा

ग्गुरमंवारायंकेवर्त्तन्तीर्थेभ्यऽआन्दंव्विषमेभ्योमैनालꣳस्वनेभ्यः
पर्णकङ्गुहाभ्यः किरातꣳ सानुभ्योजम्भकम्पर्वतेभ्यः किम्पू
रुषम् १६ बीभत्सायैपौल्कसम् ॥ बीभत्सायैपौल्कसंव्वर्णायहि
रण्यकारन्तुलायैव्वाणिजम्पश्चादोषायंग्लाविनंव्विश्वेभ्योभूते
भ्यः ÷ सिध्मलम्भूत्यैजागरणमभूत्यैस्वपनमार्त्यैजनवादिनंव्यृ
द्ध्याऽअपगल्भꣳसꣳशरायंप्रच्छिदम् १७ अक्षराजायंकितवम् ॥
अक्षराजायंकितवङ्कृतायादिनवदर्शन्त्रेतायैकल्पिनन्द्वापरायाधि
कल्पिनमास्कन्दायंसभास्थाणुम्मृत्यवेगोव्यच्छमन्तकायगोघा
तङ्क्षुधेयोगांव्विकृन्तन्तम्भिक्षमाणऽउपतिष्ठतिदुष्कृतायचरकाचार्य

म्पाप्मनेंसैलगम् १८ प्रतिश्श्रुत्कांयाऽअर्त्तनम् ॥ प्रतिश्श्रुत्कां
याऽअर्त्तनङ्घोषांयभषमन्तांयबहुवादिनंमनन्तायमूकꣳ शब्दांयाड
म्बराघातम्महंसेवीणावादङ्क्रोशांयतूणवध्ममंवरस्पुरायंशङ्खध्ममंव
नांयवनपमन्यतोंरण्यायदावपम् १९ नर्म्मायंपुँश्चलूम् ॥ नर्म्मायं
पुँश्चलूꣳ हसांयकारिंय्यादंसेशाबल्याङ्ग्रामण्यङ्गणंकमभिक्क्रोशंकु
न्तान्महंसेवीणावादम्पांणिघ्नन्तूंणवध्ममन्तान्नृत्तायांनन्दायंतलव
म् २० अग्नयेपीवांनम् ॥ अग्नयेपीवांनम्पृथिव्यैपीठसर्प्पिणंवाय
वेंचाण्डालमन्तरिक्षायवꣳशनर्त्तिनंदिवेखलतिꣳसूर्य्यांयहर्य्यक्षन्नक्ष 
त्रेभ्यःकिर्म्मिरञ्चन्द्रमंसेकिलासमन्हेंशुक्लम्पिङ्गाक्षꣳ रात्र्यैकृष्णं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्पिङ्गाक्षम् २१ अथैतान् ॥ अथैतानुष्टौविरूपानालंभतेतिंदीर्घंश्चा
तिंन्हस्वञ्चातिंस्थूलञ्चातिंकृशञ्चातिंशुक्लञ्चातिंकृष्णञ्चातिंकुल्व
ञ्चातिंलोमशञ्च ॥ अशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः ॥ मागधः
पुँश्चुलीकितवःक्लीबोशूद्राऽअब्राह्मणास्तेप्प्राजापत्याः २२ [ १६ ]
इतिसंहितापाठेत्रिंशत्तमोऽध्यायः ३० सहस्रशीर्षाषोडशाङ्गःसंभूतः
षट्द्वौद्वाविंᳬशतिः ॥ सहस्रंशीर्षापुरुंषः ॥ सहस्राक्षःसहस्रंपात् ॥ स
भूमिंᳬसर्व्वतंस्पृत्वात्यंतिष्ठद्दशाङ्गुलम् १ पुरुंषऽएव ॥ पुरुषएवेदंᳬस
र्व्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति २ ए
तावानस्य ॥ महिमातोज्ज्यायाँश्चपूरुंषः ॥ पादोस्यविश्श्वाभूतानि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संहि. त्रिपादस्यामृतन्दिवि ३ त्रिपादूर्द्ध्वः ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्ये उ.अ.
५८ हाभवत्पुनः ॥ ततोविष्ष्वङ्व्यक्क्रामत्साशनानशनेऽअभि ४ ततोवि ३१
राट् ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरि
च्यतपश्चाद्भूमिमथोपुरः ५ तस्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्व्वहुतः स
म्भृतम्पृषदाज्ज्यम् ॥ पशूँस्ताँश्चक्क्रेव्वायव्यानारण्याग्ग्राम्म्याश्च्च ये ६
तस्म्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे ॥ छन्दां
ꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ७ तस्म्मादश्श्वाः ॥ त
स्म्मादश्श्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्म्मात्त ५८
स्म्माज्जाताऽअजावयः ८ तंय्यज्ञम् ॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्न्पुरुष

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जातमंग्रतः॥तेनदेवाऽअयजन्तसाध्याऽऋषयश्चये ९ सत्पुरुषम् ॥
सत्पुरुषंयदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहू
किमूरूपादाऽउच्यते १० ब्राह्मणोस्य ॥ ब्राह्मणोस्यमुखमासी
द्वाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्याᳪशूद्रोऽअजायत ११
चन्द्रमामनसः ॥ चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥
श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत १२ नाभ्याऽआसीत्॥
नाभ्याऽआसीदन्तरिक्षᳪशीर्ष्णोद्यौःसमवर्त्तत ॥पद्भ्याम्भूमिर्दिशः
श्रोत्रात्तथालोकाः॥ ऽअकल्पयन् १३ सत्पुरुषेण ॥ हविषादेवा
यज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः १४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुप्तास्स्यासन् ॥ सुप्तास्स्यांसन्न्परिधयुस्त्रिःसुप्तसुमिधंःकृताः ॥
देवायद्युज्ञन्तंन्वानाऽअबंध्नुन्न्पुरुंषम्पुशुम् १५ युज्ञेनंयुज्ञम् ॥ युज्ञेन
युज्ञमंयजन्तदेवास्तानिधर्म्माणिप्प्रथुमान्न्यांसन् ॥ तेहुनाकंम्महि
मानंःसचन्तुयत्रुपूर्वेसाद्ध्याःसन्तिदेवाः १६ [ १६ ] अुद्ध्यःसम्भृ
तः ॥ पृथिव्व्यैरसांच्चविश्श्वकंर्म्मणुःसमंवर्तुताग्ग्रे ॥ तस्स्युत्वष्टाविु
दधंद्रूपमैतितन्न्मर्त्यस्स्यदेवुत्वमाजानुमग्ग्रे १७ वेदाहम् ॥ वेदाहमे
तम्पुरुंषम्मुहान्तंमादित्यवंर्ण्णन्तमंसःपुरस्तांत् ॥ तमेवविदित्वाति
मृत्युमैतिनान्न्यःपन्थांविद्युतेयंनाय १८ प्रजापंतिश्च्चरति ॥ प्रजा ५९
पंतिश्च्चरतिगर्ब्भेअुन्तरजांयमानोबहुधाविजांयते ॥ तस्स्युयोनिम्प

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिंपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुवनानिविश्वा १९ योदेवेभ्यः
॥ योदेवेभ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्वोयोदेवेभ्योजा
तोनमोरुचायब्राह्मये २० रुचम्ब्राह्मम् ॥ रुचम्ब्राह्ममज्जनयन्तो
देवाऽअग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे
२१ श्रीश्च ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणि
रूपमश्विनौव्यात्तम् ॥इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइ
षाण २२[६]॥२॥इतिसंहितायांएकत्रिंशोऽध्यायः३१तदेवसप्तवेनस्त
न्नवद्वौषोडश ॥ तदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥
तदेवशुक्रन्तद्ब्रह्मताऽआपःसप्रजापतिः १ सर्वेनिमेषाः ॥ सर्वेनि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेषाजंज्ञिरेव्विद्युतःपुरुषादधिं ॥ नैनंमूर्द्धंन्नतिर्र्यंश्चन्नमद्धेपरिंज
ग्ग्रभत् २ नतस्स्यं ॥ प्प्रातिमाऽअस्तियस्युनामंमुहद्यशंः ॥ हिरण्यु
गर्भऽइत्येषमामांहिंसीदित्येषायस्म्मान्नजातऽइत्येषः ३ एषोहं॥
देवःप्प्रदिशोनुसर्व्वाःपूर्वोहजातःसऽउगर्भंऽअन्तः ॥ सऽएवजातः
सजंनिष्ष्यमाणःप्प्रत्यङ्नांस्तिष्ठतिसर्व्वतोमुखः ४ यस्म्मांज्जातम॥
यस्म्मांज्जातन्नपुराकिञ्चनैवयऽआंबभूवभुवनानिविश्श्वा ॥ प्रजा
पतिःप्प्रजयासंरराणस्त्रीणिज्ज्योतींषिसचतेसषोडशी ५ येन
द्यौः ॥ येनद्यौरुग्ग्रापृथिवीचंदृढायेनस्स्वस्तभितंयेननाकंः ॥ यो
ऽअन्तरिक्षेरजंसोविमानःकस्म्मैदेवायंहविषाविधेम ६ यङ्क्रन्दसी ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षङ्क्रन्दसीऽअवंसातस्तभानेऽअभ्यैक्षेताम्मनंसारेजमाने ॥ षत्राधि
सूरऽउदितोविभातिकस्मैदेवायंहविषाविधेम ॥ आपोहषद्बृहतीर्व्वि
श्चुदापंः ७ [ ७ ] वेनस्तत् ॥ वेनस्तत्पंश्यन्निहितङ्गुहासद्यत्रवि
श्श्वम्भवत्येकंनीडम्॥तस्मिन्निदंᳬसञ्चविचैतिसर्व्वंᳬसऽओतःप्रो
तंश्चविभूःप्प्रजासु ८ प्रतत् ॥ प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वोधाम
